## संहत्याः प्रभावम् ।

पुरा किल कस्मिंश्चिदाश्रमेऽवसत् कोऽपि महर्षिः। सोऽतीव चतुरो बहुश्रुतश्चासीत्। कुशलोऽयमध्यापक इति तस्मिञ्जनपदे सोऽभवत् सर्वेषां पूजास्थानम्। गच्छता कालेन स मुनिर्वृद्धत्वमापन्नः। तत एकस्मिन् दिने स्वनिधनकालमासन्नं ज्ञात्वा स आत्मनस्तनयान् समाहूयावदत्। ''अयि बालकाः, प्रस्थितोऽहमस्मान्मृत्युलोकाद्देवलोकम्। न केनापि शोचनीयं मे मरणम्। ईशकृपया सुखेनैव तनुमेतां त्यक्तुं समर्थोऽस्मि। युष्माभिः पुनरस्मिन्नाश्रमपदे सद्धर्मेण व्यवहर्तव्यम्। न कदापि मतिभेदो जायतां मम पुत्रेषु युष्मासु।

अपरं च 'संहतिः कार्यसाधिका' इति संप्रत्येव दर्शयामि। इत्युक्त्वा स महर्षिः प्रादिशत् पुत्रान् काष्ठभारमाहर्तुम्। तैस्तथनुष्ठिते सति सोऽभाषत। "अयि बालः, एनं काष्टभारं खण्डयत यूयमेकैकश इति"। तदनुसारेण तैस्त्रिभिः पुत्रैस्तस्य भञ्जने प्रयत्नाः कृताः। किन्तु नैकोऽपि समर्थोऽभवत् तं खंडयितुम्। ततो भारादुन्मोचितानि काष्ठानि भङ्क्तुं तानाज्ञापयात् स वृद्धः। तदनुरोधात्तानि सर्वाण्यपि काष्ठानि पृथक् पृथग् लीलयैव भग्नानि तैः पुत्रैः। एतदालोक्यासौ मुनिः प्राह। "पश्यतैनं संहत्याः प्रभावम्। तथैव यावद्यूयं संहतास्तावन्न कोऽपि शत्रुर्युष्माकं विनाशायालम्। परं व्यस्ताश्चेद्यूयं हेलयैव विनश्येत। अत एवोपरिनिर्दिष्टं कविवचनं मनसि निधाय सर्वथा व्यवहर्तव्यं तदनुरोधेन" इत्युपदिश्य पञ्चत्वं गतः स महर्षिः।

अभिनवापाठावली ०२। कथा ०१

## दर्पान्नशो नयात्सुखम्।

आसीत् कस्मिंश्चिद्वनोद्देशे विस्तीर्णा तृणभूमिः। तत्राचरन् प्रत्यहं बहवोऽजा मेषाश्च। तत्पर्यन्ते स्वादुजलमावहत् काचिन्नदी। तस्या एकस्मात्तटादन्यत्तटं गन्तुं कृत आसीद् दारुफलकेन सेतुः। तस्याधस्ताद् गभीरो जलाशयोऽवर्तत। जनैः सावधानतयैव स सेतुराक्रमितव्यो यतो हस्तमात्र एव स विस्तृत आसीत्। समकाले न द्वौ पशू मनुजौ वा तस्योपरि चलितुं शक्तौ।

अथैकदा कौचिदजौ परस्परविरुद्धां दिशमुद्दिश्य प्रस्थितौ। संमुखमतिष्टतां च सेतोर्मध्यभागे। कः प्रथमं गमनायालमिति परस्परस्य बलं ज्ञातुमिव तौ मुहूर्तं स्तब्धावास्ताम्। ततस्तयोरेकतरोऽन्यं शृङ्गाभ्यां प्रहर्तुमारभत। तदा स द्वितीयोऽपि तं तथैव शीर्षाघातैः पृष्टतः प्रक्षेप्तुमुद्यतोऽभवत्। एवं समुद्भूतः तयोः कलहः। दृढं प्राहरतां तौ परस्परं

शृङ्गाभ्याम्। ततः सहसैव फलकाद् भ्रष्टौ तयोरेकतरस्य पश्चिमपदौ। तमधः पतन्तं प्रहरन्नसौ द्वितीयोऽपि सेतोश्च्युतः। एवं द्वावपि तौ छागौ पतितौ निमग्नौ च तस्मिन् गभीरे जले।

अन्येद्युः किमप्यन्यदजद्वयं तेनैव मर्गेण परस्परविरुद्धां दिशमुद्दिस्य प्रस्थितम्। तावन्योन्यममिलतां सेतुमद्ये। तत्र स्थलाभावं वीक्ष्य तयोरेकतरो महतावधानेन तस्मिन् फलके शनैः शनैरुपाविशत्। ततः स द्वितीयस्तस्य शरीरे मन्दं मन्दं पदानि निधाय पारमगच्छत्। अनन्तरं स प्रथमोऽजः शनैरुत्थायात्मनो मर्गं सुखेनाक्रमत। एवं द्वावपि तौ छागौ नदीतटं क्षेमेण प्राप्नुताम्। विवेको विनयश्च न केवलं जातिमाश्रयतः किन्तु व्यक्तिविशेषमपि॥



## महान् विवादः।

जन्मान्धानां स्पर्शेन्द्रियं प्रायः सुतीक्ष्णं भवतीति प्रसिद्धम्। परिचिताः क्रियाः कुर्वन्ति ते लीलयैव। विना स्खलनं च गच्छन्ति यष्टिसहायाः स्थानात् स्थानम्। आगामिनः पुरुषस्य पादाघातं श्रुत्वैव ते तं संविदते। केचिद् ग्रामिका अन्धा गा मेषान् वा इतस्ततो नयन्ति परिपालयन्ति च। अपरे नित्याभ्यासेनानुतिष्ठन्ति सौचिकस्यापि व्यापारम्।

अथ कस्मिंश्चिद् ग्रामे निवसन्ति स्म षडन्धाः। आत्मनः स्पर्शज्ञाने प्रवीण्यमुद्दिश्य सञ्जाता कदाचित् तेषामहमहमिका। ततस्तैरेवं प्रतिज्ञातम्। गजस्याकारं यः कोऽपि यथार्थं वर्णयति स एवास्मासु श्रेष्ठ इति। स्पर्शमात्रेणैवासौ हस्ती वर्णनीयः। न कस्याप्यन्यस्य साहाय्यं ग्रहीतव्यमिति। तदनुरोधात् तेऽन्धाः प्राप्ता गजस्य समीपम्। प्रथमो यावदुपसर्पति तावत्करिण उदरं सोऽस्पृशत्। ततः स उच्चैरवदत्। "अहो भित्तिरेवैषा दृश्यते। भित्तिरूपो ननु गजः" इति। द्वितीयेन धृतस्तस्य पशोः पादः उक्तं च। ''अहो स्थूलताऽस्य स्तम्भस्य। स्तम्भरूपः खलु गजः इति''। तृतीयेन करे प्राप्तं हस्तिनो लाङ्गूलम्। तदाऽसावुदगिरत्। "आश्चर्यं भोः, रज्जुरेवेयमिति मन्ये। असंशयं रज्जुरूपोऽयं कुञ्जरः" इति।

चतुर्थो हस्तेन गृहीतवान् नागस्य कर्णम्। ससंभ्रमं तेनोद्घोषितम्। "हन्त विस्तृतमेतद्व्यजनम्। व्यजनरूपोऽयं मातङ्ग इति मे निश्चयः" इति। पञ्चमो गजस्य शुण्डामवलम्ब्य प्राख्यापयद् दीर्घस्वरेण। "अये, विशालोऽसौ सर्पोऽत्र विलुठति। अहिरूपोऽसौ करीति मे मतिः" इति। अन्ततः षष्ठोऽन्धस्तस्य वारणस्यरदं धृत्वानुच्चैरवदच्च। "अहो निशितः कठिनश्चायं शूलः शूलरूप एष द्विरद इति नात्र संशयः" इति। अनन्तरं ते सर्वे व्यावक्षत स्वमतं तारस्वरेण न

चामन्यन्त परमतम्। तेन सुचिरं प्रावर्तत तेषां महान् विवादः। एवमपूर्वं किमपि तेषां निरीक्षणकौशलं ज्ञात्वा भृशं विनोदमन्वभवन् सर्वे ग्रामवासिनो जनाः।

अभिनवापाठावली ०२ कथा १३

## विरम, विरम रे शठ।

आसीत् कस्मिंश्चन्नगरे कथाप्रियो नाम कोऽपि राजा। राज्यकार्य उदासीनोऽसौ विनोदेन कालमनयत् स्तुतिपाठकैः सह सततम्। प्रत्यहं नूतनः कश्चित्पुरुषः कथयति नृपतयेऽभिनवां कथाम्। कथाश्रवणेन हृष्टः स भूपश्च तस्मै प्रयच्छति बहुमूल्यं पारितोषिकम्। एकस्मिन् दिने रम्या काचित्कथा तेन श्रुता। किन्तु सा सत्वरमेव समाप्तेति स विषण्णोऽभवत्। तदा क्रोधवशात्तेनेदमुक्तम्। यः कोऽपि सुदीर्घां कथां कथयिष्यति तस्मै प्रदास्यामि राज्यार्धमात्मनः कन्यां च। परं यस्य कथा शीघ्रमेव समाप्तिं यास्यति तस्य शिरश्छेत्स्यामीति।

ततः प्रथमेन कथयित्रादिनान्तं कथिता हास्यरसेन पूर्णाऽख्यायिका। किन्तु यदाऽसौ समाप्ता तदा रोषवशात्स राजा तस्य वधमकारयत्। द्वितीयः पण्डितो दिनद्वयपर्यन्तमवर्णयद्वीररसेन युक्तां कांचित्कथाम्। परमवसन्नायामेव तस्यां तस्य शिरश्छिन्नमभवत्। तृतीयाद्वक्तुः करुणरसप्रधाना कथा श्रुताऽमुना राज्ञा। चत्वारि दिनानि व्यतीतानि तस्याः श्रवणेन। किन्तु कथायाः कथकप्राणानां च समाप्तिः समकालिकैवासीत्। ततः कश्चिद्धूर्तो युवा कथामेतां कथयितुं प्रारभत।

“आसीत् कोऽपि महान् धनिकः कस्मिंश्चिन्नगरे। चत्वारः पुत्रा द्वे कन्ये च तस्यासन्। विशालं धान्यागारमासीत्तस्य धनिकस्य। कस्मिंश्चिद् दिने तस्यानाच्छादितं विवरं दृष्ट्वा कश्चन चटक आगतो धान्यकणं च गृहीतवान्। अनन्तरं कोऽप्यन्यः खग आगतो धान्यकणं च गृहीतवान्। ततः कश्चिदपरः खग आगतो धान्यकणं च गृहीतवान्।

| | |
|---|---|
| कथाप्रियः | - श्रुतमेतदवगतं च। ततस्ततः। |
| युवा | - देव, अनन्तरं कोऽप्यन्यः खग आगतो धान्यकणं च गृहीतवान्। |
| कथाप्रियः | - ज्ञातमेतद्। अन्यत् किमपि कथय। |
| युवा | - अनन्तरं कश्चिदन्यः खग आगतो धान्यकणम् च गृहीतवान्। |

| | |
|---|---|
| कथाप्रियः | - भवत्वेतद्। रे मूर्ख, किमन्यत् कथयितव्यमस्ति? |
| युवा | - अनन्तरमन्यः कोऽपि खग आगतो धान्यकणं च गृहीतवान्। |
| कथाप्रियः | - ननु मूढमते, कथय कथायाम् अपरं भागम्। किमर्थं पुनः पुनः कर्णकटु प्रजल्पसि एकमेव वाक्यम् ? |
| युवा | - देव विशालं तद्धान्यागारम्। तस्मात् सर्वान् धान्यकणान् खगाः कथं नीतवन्तदेकैकशः कथनीयम्। पश्चाद्धनिकस्य कुमाराणां पराक्रमाः कुमारीणां च चातुर्यं वर्णनीयम्। शृणोतु महाराजः। "अनन्तरं कोऽप्यन्यः खग आगतो धान्यकणं च गृहीतवान्।" |
| कथाप्रियः | - विरम, विरम रे शठ। न श्रोतुमिच्छामि नीरसामिमां कथाम्। |
| युवा | - यच्छतु महाराजस्तर्हि राज्यार्धं स्वकन्यां च मह्यम्। जिता भवतः प्रतिज्ञा मया। |
| कथाप्रियः | - (चिरं विचार्य) सत्यमेतद्। का वा गतिः। गृहाण मे राज्यार्धं कन्यां च। जीतोऽस्मि खलु त्वया। |

अभिनवापाठावली ०२ कथा २३

पञ्चतन्त्रे काकोलूकीयम्। कथा ०५, १०

## नूनं सौवर्णदीनारपूर्णोऽयं वाल्मीकः।

अस्ति कस्मिंश्चिदधिष्ठाने हरिदत्तो नाम ब्राह्मणः। तस्य च कृषिं कुर्वतः सदैव निष्पलः कालोऽतिवर्तते। अथैकस्मिन्दिवसे स ब्राह्मण उष्णकालावसाने घर्मार्तः स्वक्षेत्रमध्ये वृक्षच्छायायां प्रसुप्तोऽनतिदूरेवल्मीकोपरि प्रसारितं बृहत्फटायुक्तं भीषणं भुजङ्गमं दृष्ट्वा चिन्तयामास। नूनमेषा क्षेत्रदेवता मया कदाचिदापि न पूजिता। तेनेदं मे कृषिकर्म विफली भवति। तदस्या अहं पूजामद्य करिष्यामि। इत्यवधार्य, कुतोऽपिक्षिरं याचित्वा शरावे निक्षिप्य वल्मीकान्तिकमुपगत्योवाच- "भोः क्षेत्रपाल! मयैतावन्तं कालं न ज्ञातं यतत्वमत्र वससि। तेन पूजा न कृता। तत्साम्प्रतं क्षमस्व" इति। एवमुक्त्वा दुग्धं च निवेद्य गृहाभिमुखं प्रायात्।

अथ प्रातर्यावदागत्य पश्यति तवद्दीनारमेकं शरावे दृष्टवान्। एवं च प्रतिदिनमेकाकी समागत्य तस्मै क्षीरं ददाति, एकैकञ्च दीनारं गृह्णाति। अथैकस्मिन् दिवसे वाल्मीके क्षीरनयनाय पुत्रं निरूप्य ब्राह्मणो ग्रामान्तरं जगाम। पुत्रोऽपि क्षीरं तत्र नीत्वा संस्थाप्य च पुनर्गृहं समायातः। दिनान्तरे तत्र गत्वा दीनारमेकं च दृष्ट्वा गृहीत्वा च

चिन्तितवान्। "नूनं सौवर्णदीनारपूर्णोऽयं वाल्मीकः"। तदेनं हत्वा सर्वमेकवारं ग्राहीष्यामि। "इत्येवं सम्प्रदार्यान्येद्युः क्षीरं ददता ब्राह्मणपुत्रेण सर्पो लगुडेन शिरसि ताडितः। ततः कथमपि दैववशादमुक्तजीवित एव रोषात्तमेवतीव्रविषादशनैस्तथादशत् यथा स सद्यः पञ्चत्वमुपागतः। स्वजनैश्च नातिदूरे क्षेत्रस्य काकाष्ठसंचयैः संस्कृतः। अथ द्वितीयदिने तस्य पिता समायातः। स्वजनेभ्यः सुतविनाशकारणं श्रुत्वा तथैव समर्थितवान्।

पञ्चतन्त्रे काकोलूकीयम्। कथा ०५

## सर्वं वै मूर्खमण्डलम्।

अस्ति कस्मिंश्चित्पर्वतैकदेशे महान्वृक्षः। तत्र च सिम्भुक नाम कोऽपि पक्षी प्रतिवसति स्म। तस्य पुरीषे सुवर्णमुत्पद्यते। अथ कदाचित्तमुद्दिश्य व्याधः कोऽपि समाययौ। स च पक्षी तदग्रत एव पुरिषमुत्ससर्ज। अथ पातसमकालमेव तत्सुवर्णीभूतं दृष्ट्वा व्याधो विस्मयमगमत्। "अहो! मम शिशुकालादारभ्य शकुणिबन्धव्यसनिनोऽशीतिर्वर्षाणि समभूवन्, न च कदाचिदापि पक्षीपुरीषे सुवर्णंदृष्टम्"। इति विचिन्त्य तत्र वृक्षे पाशं बबन्ध। अथासावपि पक्षी मूर्खस्तत्रैव विश्वस्तचित्तो यथापूर्वमुपविष्टस्तत्कालमेव पाशेन बद्धः। व्याधस्तु तं पाशादुन्मुच्य पञ्जरके संस्थाप्य निजावासं नीतवान्।

अथ चिन्तयामास - 'किमनेन साऽपायेन पक्षिणाहं करिष्यामि? यदि कदाचित्कोऽप्यमूमीदृशं ज्ञात्वा राज्ञे निवेदयिष्यति, - तन्नूनं प्राणसंशयो मे भवेदतः स्वयमेव पक्षिणं राज्ञे निवेदयामि" इति विचार्य तथैवाऽनुष्टितवान्। अथ राजापि तं पक्षिणं दृष्ट्वा विकसितनयनवदनकमलः परां तुष्टिमुपागतः। प्राह चैवम् -"हंहो ! रक्षापुरुषाः ! एनं पक्षिणं यत्नेन रक्षत। अशपानादिकं चास्य यथेच्छं प्रयच्छत " अथ मन्त्रिणाऽभिहितम् 'किमनेनाश्रद्धेयव्याधवचनप्रत्ययमात्रपरिगृहीतेन अण्डजेन? किं कदाचित्पक्षिपुरीषे सुवर्णं संभवति? तन्मुच्यतां पञ्जरबन्धनादयं पक्षी। इति मन्त्रिवचनाद्राज्ञा मोचितोऽसौ पक्ष्युन्नतद्वारतोरणे समुपविश्य सुवर्णमयीं विष्टां विधाय-

पूर्वन्तावदहं मूर्खो द्वितीयः पाशबन्धकः।
ततो राजा च मन्त्री च सर्वं वै मूर्खमण्डलम्॥ इति श्लोकं पठित्वा यथासुखमाकाशमार्गेन प्रायात्।

पञ्चतन्त्रे लब्धप्रणाशम्। कथा ०४

## वत्स! त्वं श्रृगालीसुतः।

कस्मिंश्चिद्देशे सिंहदम्पती प्रतिवसतः स्म। अथ सिंही पुत्रद्वयमजीजनत्। सिंहोऽपि नित्यमेव मृगान्व्यापाद्य सिंह्यै ददाति। अथान्यस्मिन्नहनि तेन किमपि नासादितम्। वने भ्रमतोऽपि तस्य रविरस्तं गतः। अथ तेन स्वगृहमागच्छता श्रृगालशिशुः प्राप्तः। स च बालकोऽयमित्यवधार्य, यत्नेन दंष्ट्रामध्यगतं कृत्वा सिंह्यै जीवन्तमेव समर्पितवान्। ततः सिंह्याऽभिहितम् – "भोः कान्त ! त्वयानितं किंचिदस्माकं भोजनम् ?" सिंह आह – "प्रिये ! मयाऽद्यैनं शृगालशिशुं परित्यज्य न किंचित्सत्त्वमासादितम् ; स च मया "बालोऽयमिति" मत्वा न व्यापादितो विशेषात्स्वजातीयश्च।

इदानिं त्वमेनं भक्षयित्वा पथ्यं कुरु। प्रभातेऽन्यत्किञ्चिदुपार्जयिष्यामि। सा प्राह – "भोः कान्त ! त्वया बालकोऽयमिति विचिन्त्य न हतः, तत्कथमेनमहं स्वोदरार्थे विनाशयामि?" "तस्मान्ममायं तृतियः पुत्रो भविष्यति।" इत्येवमुक्त्वा तमपि स्वस्तनक्षीरेण परां पुष्टिमनयत्। एवं ते त्रयोऽपि शिशवः परस्परमज्ञातजातिविशेषा एकाचारविहारा बाल्यसमयं निर्वाहयन्ति स्म। अथ कदाचित्तत्र वने भ्रमन्नरण्यगजः समायातः। तं दृष्ट्वा तौ सिंहसुतौ द्वावपि कुपिताननौ तं प्रति प्रचलितौ यावत्, तावत्तेन श्रृगालसुतेनाभिहितम् – "अहो, गजोऽयं युष्मत्कुलशत्रुः; तन्न गन्तव्यमेतस्याभिमुखम्।" एवमुक्त्वा गृहं प्रति प्रधावितः। तावपि ज्येष्ठबान्धवभङ्गान्निरुत्साहतां गतौ।

अथ तौ द्वावपि भ्रातरौ गृहं प्राप्य पित्रोरग्रतो विहसन्तौ ज्येष्ठभ्रातृचेष्टितमूचतुः - यथाऽयं गजं दृष्ट्वा दूरतोऽपि प्रनष्टः। सोऽपि तदाकर्ण्य कोपाविष्टमनाः प्रस्फुरिताधरपल्लवस्ताम्रलोचनस्त्रिशिखां भ्रकुटिं कृत्वा तौ

निर्भर्त्सयन् परुषतरवचनान्युवाच। ततः सिंह्या एकान्ते नीत्वा प्रबोधितोऽसौ – "वत्स! मैवं कदाचिज्जल्प भवदीयलघुभ्रातरावेतौ" इति। अथासौ प्रभूततरकोपाविष्टस्तामुवाच "किमहमेताभ्यां शौर्येण, रूपेण, विद्याभ्यासेन, कौशलेन वा हीनो, येन मामुपहसतः ? तन्मयाऽवश्यमेतौ व्यापादनीयौ। तदाकर्ण्य सिंही तस्य जीवितमिच्छन्त्यविहस्य प्राह।

तत्सम्यक् श्रृणु – "वत्स! त्वं श्रृगालीसुतः। कृपया मया स्वस्तनक्षीरेण पुष्टिं नीतः। तद्यावदेतौ मत्पुत्रौ शिशुत्वात्त्वां श्रृगालं न जानीतः, तावद्दुततरं गत्वा स्वजातियानां मध्ये मिलितो भव। नो चेदाभ्यां हतो मृत्युपथं समेष्यसि।" सोऽपि तद्वचनं श्रुत्वा भयव्याकुलमनाः शनैः शनैरपसृत्य स्वजात्या मिलितः।

पञ्चतन्त्रे लब्धप्रणाशम्। कथा ०४

<u>අර්ථ පරිවර්තන</u>

## संहत्याः प्रभावम्।

සමගියේ මහිමය

पुरा किल कस्मिंश्चिदाश्रमेऽवसत् कोऽपि महर्षिः। सोऽतीव चतुरो बहुश्रुतश्चासीत्। कुशलोऽयमध्यापक इति तस्मिञ्जनपदे सोऽभवत् सर्वेषां पूजास्थानम्। गच्छता कालेन स मुनिर्वृद्धत्वमापन्नः। तत एकस्मिन् दिने स्वनिधनकालमासन्नं ज्ञात्वा स आत्मनस्तनयान् समाहूयावदत्। ''अयि बालकाः, प्रस्थितोऽहमस्मान्मृत्युलोकाद्देवलोकम्। न केनापि शोचनीयं मे मरणम्। ईशकृपया सुखेनैव तनुमेतां त्यक्तुं समर्थोऽस्मि। युष्माभिः पुनरस्मिन्नाश्रमपदे सद्धर्मेण व्यवहर्तव्यम्। न कदापि मतिभेदो जायतां मम पुत्रेषु युष्मासु।

पुरा किल අතීතයෙහි වනාහි कस्मिंश्चित् आश्रमे කිසියම් අසපුවක

कः अपि महर्षिः अवसत्। කිසියම් මහා ඍෂිවරයෙක් වාසයකළේ ය.

(कस्मिंश्चित्+आश्रमे+अवसत् / कः+अपि)

सः अतीव चतुरः च ඔහු අතිශයින් ම දක්ෂ වූයේ ද बहुश्रुतः च आसीत्। බොහෝ ඇසූපිරූ තැන් ඇති වූයේ ද විය. (सः+अतीव / बहुश्रुतः+च+आसीत्)

अयम् कुशलः अध्यापकः इति මේ තෙමේ දක්ෂ ආචාර්යවරයෙකි යැයි तस्मिन् जनपदे ඒ ජනපදයෙහි

सः सर्वेषां पूजास्थानम् अभवत्। හෙතෙම සියල්ලන්ගේ පිදීමට පාත්‍ර වූයේ ය.

(कुशलः+अयम्+अध्यापकः+इति/ तस्मिन्+जनपदे / सः+अभवत्)

गच्छता कालेन කල්ගතවෙද්දී सः मुनिः वृद्धत्वम् आपन्नः। ඒ මුනිවරයා මහලු බවට පැමිණියේ ය.

(मुनिः+वृद्धत्वम्+आपन्नः)

ततः एकस्मिन् दिने ඉක්බිත්තෙන් එක් දිනයක स्वनिधनकालं තමන්ගේ මරණ සමය

आसन्नं ज्ञात्वा ආසන්න යැයි දැන, (स्वनिधनकालम्+आसन्नं)

सः आत्मनः तनयान् හෙතෙම තමන්ගේ දරුවන් समाहूय अवदत्। කැඳවා මෙසේ කීවේ ය.

(आत्मनः+तनयान् / समाहूय+अवदत्)

''अयि बालकाः, ප්‍රිය දරුවනි, अहम् अस्मात् मृत्युलोकात् මම මේ මිනිස් ලොවින් देवलोकम् प्रस्थितः (अस्मि)। දෙව් ලොවට පිටත් *වූවෙක් වන්නට නියමිත* (වන්නෙමි.) (प्रस्थितः+अहम्+अस्मात्+मृत्युलोकात् +देवलोकम्।)

केन अपि කවරකු විසින් වත් मे मरणम् न शोचनीयं මාගේ මරණයට ශෝක නොකටයුතු යි. (केन+अपि)

ईशकृपया ඊශ්වර කරුණාවෙන් सुखेन एव एतां तनुम् සැපසේ ම මේ ශරීරය

त्यक्तुं समर्थः अस्मि। අත්හරින්නට සමර්ථ වූයේ වෙමි. (වන්නෙමි) (सुखेन+एव / तनुम्+एतां / समर्थः+अस्मि)

युष्माभिः නුඹලා විසින් पुनः अस्मिन् आश्रमपदे නැවත මේ අසපුවෙහි

सद्धर्मेण व्यवहर्तव्यम्। ධර්මානුකූල ව පැවතිය යුතුයි. (पुनः+अस्मिन्+आश्रमपदे)

मम पुत्रेषु युष्मासु මාගේ පුත්‍රයන් වූ නුඹලා අතරෙහි

कदा अपि मतिभेदः न जायताम्। කිසිකලෙකත් මතභේදයක් නොඋපදීවා. (मतिभेदः+जायतां / कदा+अपि)

अपरं च 'संहतिः कार्यसाधिका' इति संप्रत्येव दर्शयामि। इत्युक्त्वा स महर्षिः प्रादिशत् पुत्रान् काष्ठभारमाहर्तुम्। तैस्तथनुष्ठिते सति सोऽभाषत। "अयि बालः, एनं काष्टभारं खण्डयत यूयमेकैकश इति"। तदनुसारेण तैस्त्रिभिः पुत्रैस्तस्य भञ्जने प्रयत्नाः कृताः। किन्तु नैकोऽपि समर्थोऽभवत् तं खंडयितुम्। ततो भारादुन्मोचितानि काष्ठानि भङ्क्तुं तानाज्ञापयात् स वृद्धः। तदनुरोधात्तानि सर्वाण्यपि काष्ठानि पृथक् पृथग् लीलयैव भग्नानि तैः पुत्रैः। एतदालोक्यासौ मुनिः प्राह। "पश्यतैनं संहत्याः प्रभावम्। तथैव यावद्यूयं संहतास्तावन्न कोऽपि शत्रुर्युष्माकं विनाशायालम्। परं व्यस्ताश्चेद्यूयं हेलयैव विनश्येत। अत एवोपरिनिर्दिष्टं कविवचनं मनसि निधाय सर्वथा व्यवहर्तव्यं तदनुरोधेन" इत्युपदिश्य पञ्चत्वं गतः स महर्षिः।

अपरं च තව ද 'संहतिः कार्यसाधिका' इति සමගිය කටයුතු සිදුකරන්නී යයි (යන කාරණය)

संप्रति एव दर्शयामि। දැන්ම ම පෙන්වන්නෙමි. (संप्रति+एव)

इति उक्त्वा යනුවෙන් පවසා सः महर्षिः ඒ මහ සෘෂිතෙමේ काष्ठभारम् आहर्तुम् දරමිටියක් ගෙන එන්නට

पुत्रान् प्रादिशत्। පුතුන්ට නියෝග කළේ ය. (इति+उक्त्वा / काष्ठभारम् +आहर्तुम्

तैः ඔවුන් විසින් तथा अनुष्ठिते सति එසේ කළ කල්හි सः अभाषत। හෙතෙම කීයේ ය.

(तैः+तथा+अनुष्ठिते / सः+अभाषत)

"अयि बालाः, පින්වත් දරුවෙනි, यूयम् නුඹලා एनं काष्टभारं මේ දරමිටිය

एक एकशः खण्डयत इति"। එක එකා බැගින් කඩව්! යනුවෙන් (පැවසීය.) यूयम्+एक+एकशः+इति)

तत् अनुसारेण ඒ ක්‍රමයෙන් तैः त्रिभिः पुत्रैः ඒ පුත්‍රයන් තිදෙන විසින් तस्य भञ्जने එය කැඩීමෙහි प्रयत्नाः

कृताः। උත්සාහයෝ කරන ලද්දාහ. (तत् +अनुसारेण / तैः+त्रिभिः)

किन्तु එසේ වුවත්, एकः अपि එකෙක්වත් तं खंडयितुं समर्थः न अभवत् එම දරමිටිය කැඩීමට සමත් නොවීය.

(न+एकः+अपि / समर्थः+अभवत्)

ततः ඉක්බිති भारात् उन्मोचितानि काष्ठानि මිටියෙන් මුදන ලද දර भङ्क्तुं කඩන්නට

सः वृद्धः तान् आज्ञापयात्। ඒ මහල්ලා ඔවුන්ට අණකළේ ය. (भारात्+उन्मोचितानि / तान्+आज्ञापयात्)

तत् अनुरोधात् ඊට එකඟවීමෙන් तैः पुत्रैः ඒ පුත්‍රයන් විසින්

तानि सर्वाणि अपि काष्ठानि ඒ සියලු දර पृथक् पृथग् වෙන වෙන ම लीलया एव भग्नानि। ලතාවකට මෙන් කඩන ලද්දාහ. (तत्+अनुरोधात्+तानि सर्वाणि+अपि / लीलया+एव)

एतत् आलोक्य එය බලා असौ मुनिः प्राह। ඒ මුනිවරයා මෙසේ කීවේ ය. (एतत् +आलोक्य+असौ)

"एनं संहत्याः प्रभावम् पश्यत। මෙම සමගියේ මහිමය බලව්! (पश्यत+एनं)

तथा एव। ඒක එහෙම තමයි. यावत् यूयं संहताः तावत् යම්තාක් නුඹලා සමගි වූවාහු ද, ඒ තාක්

कः अपि शत्रुः කිසියම් හෝ සතුරෙක් युष्माकं विनाशाय न अलम्। තොපගේ විනාශය සඳහා නුසුදුසු ය.

(तथा+एव यावत्+यूयं संहताः+तावत्+न कः+अपि /शत्रुः+युष्माकं / विनाशाय+अलम्)

परं चेत् यूयं व्यस्ताः එතකුදු වුවත් ඉදින් නුඹලා අසමගිව සිටියා නම්

हेलया एव विनश्येत। පහසුවෙන් ම විනාශවන්නේ ය. (व्यस्ताः+चेत् +यूयं / हेलया+एव)

अतः एव එහෙයින් ම उपरिनिर्दिष्टं පෙර දක්වන ලද कविवचनं मनसि निधाय, කවි වචනය සිත්හි දරා

(अतः+एव+उपरिनिर्दिष्टं)

सर्वथा तत् अनुरोधेन व्यवहर्तव्यम्" इति හැම විට ම එය පිළිපදින්නැයි. යනුවෙන්

उपदिश्य උපදෙස් දී सः महर्षिः पञ्चत्वं गतः। ඒ මහ සෘෂිවරයා මරණයට පත්විය.

(तत्+अनुरोधेन / इति+उपदिश्य)

अभिनवापाठावली ०२। कथा ०१

<u>අර්ථ පරිවර්තනය</u>

## दर्पान्नशो नयात्सुखम्।

උඩඟුකමෙන් විනාශය ද නීතියෙන් සැපය ද වේ.

आसीत् कस्मिंश्चिद्वनोद्देशे विस्तीर्णा तृणभूमिः। तत्राचरन् प्रत्यहं बहवोऽजा मेषाश्च। तत्पर्यन्ते स्वादुजलमावहत् काचिन्नदी। तस्या एकस्मात्तटादन्यत्तटं गन्तुं कृत आसीद् दारुफलकेन सेतुः। तस्याधस्ताद् गभीरो जलाशयोऽवर्तत। जनैः सावधानतयैव स सेतुराक्रमितव्यो यतो हस्तमात्र एव स विस्तृत आसीत्। समकाले न द्वौ पशू मनुजौ वा तस्योपरि चलितुं शक्तौ।

कस्मिंश्चिद्वनोद्देशे කිසියම් වන පෙදෙසෙක්හි विस्तीर्णा तृणभूमिः आसीत्। පැතිරුණු තණ බිමක් විය.

तत्र प्रत्यहं එහි දිනපතා बहवाः अजाः च मेषाः च आचरन्। බොහෝ එළුවෝ ද, බැටළුවෝ ද හැසිරුණහ. [තණ කෑවාහු ය.] (तत्र+आचरन् / प्रति+अहं / बहवः+अजा / मेषाः+च)

तत्पर्यन्ते එහි කෙළවර स्वादुजलं මිහිරි ජලය ඇති काचित् नदी आवहत्। කිසියම් ගඟක් ගලා බැස්සේ ය.

(स्वादुजलम्+आवहत्  / काचित्+नदी)

तस्या එහි एकस्मात् तटात् अन्यत् तटं එක් ඉවුරකින් අනෙක් ඉවුරට

गन्तुं යෑමට दारुफलकेन कृतः सेतुः आसीत्।  දැව ලෑල්ලකින් කරන ලද ඒදණ්ඩක් විය.

(एकस्मात्+तटात्+अन्यत्+तटं)

तस्या अधस्तात् ඒ ඒදණ්ඩ යටින් गभीरः जलाशयः अवर्तत। ගැඹුරු වූ ජලාශය පැවතිණ.

(तस्य+अधस्तात्  / जलाशयः+अवर्तत)

जनैः ජනයා විසින් सावधानतया एव අවධාන සහිත ව ම सः सेतुः आक्रमितव्यः। ඒ හෙය ඉක්මවා යායුතු යි.

(सावधानतया+एव  / सेतुः+आक्रमितव्यः)

सः हस्तमात्र एव विस्तृत आसीत् यतः। ඒ [ඒ දණ්ඩ] වියතක් විතර පමණක් පළල් වූ හෙයිනි.

समकाले එකවිට द्वौ पशू वा मनुजौ वा සිවුපාවුන් දෙදෙනකුට හෝ මිනිසුන් දෙදෙනකුට හෝ तस्य उपरि चलितुं न शक्तौ।   ඒ මත ගමන් කරන්නට නොහැක්කේ ය. (तस्य+उपरि)

अथैकदा कौचिदजौ परस्परविरुद्धां दिशमुद्दिश्य प्रस्थितौ। संमुखमतिष्टतां च सेतोर्मध्यभागे। कः प्रथमं गमनायालमिति परस्परस्य बलं ज्ञातुमिव तौ मुहूर्तं स्तब्धावास्ताम्। ततस्तयोरेकतरोऽन्यं शृङ्गाभ्यां प्रहर्तुमारभत। तदा स द्वितीयोऽपि तं तथैव शीर्षाघातैः पृष्टतः प्रक्षेप्तुमुद्यतोऽभवत्। एवं समुद्भूतः तयोः कलहः। दृढं प्राहरतां तौ परस्परं शृङ्गाभ्याम्। ततः सहसैव फलकाद् भ्रष्टौ तयोरेकतरस्य पश्चिमपदौ। तमधः पतन्तं प्रहरन्नसौ द्वितीयोऽपि सेतोश्च्युतः। एवं द्वावपि तौ छागौ पतितौ निमग्नौ च तस्मिन् गभीरे जले।

अथ एकदा ඉක්බිති දිනක कौचित् अजौ කිසියම් එළුවෝ දෙදෙනෙක් परस्परविरुद्धां दिशम् उद्दिश्य ඔවුනොවුන්ට විරුද්ධ දිශා දෙසට प्रस्थितौ। පිටත්වූවාහු ය.

(अथ+एकदा / कौचिद्+अजौ / दिशम्+उद्दिश्य)

सेतोः मध्यभागे ඒදණ්ඩෙහි මැද දී  संमुखम् अतिष्टतां च। මුණගැසුණහ.   (संमुखम्+अतिष्टतां / सेतोः+मध्यभागे)

कः प्रथमं गमनाय अलम् इति। කවරෙක් පළමුකොට ගමනට සුදුසු ද යනුවෙන්, (गमनाय+अलम्+इति)

परस्परस्य बलं ज्ञातुम् इव ඔවුනොවුන්ගේ බලය දැනගන්නට මෙන්

तौ मुहूर्तं स्तब्धौ आस्ताम्। ඔවුහු දෙදෙනා මොහොතක් නිශ්චල ව සිටිය හ. (ज्ञातुम्+इव / स्तब्धौ+आस्ताम्)

ततः ඉක්බිති तयोः एकतरः ඔවුන් දෙදෙනාගෙන් එකෙක්

अन्यं शृङ्गाभ्यां प्रहर्तुम् आरभत। අනිකාට දෙඅඟින් පහරදෙන්නට පටන්ගත්තේ ය.

(ततः+तयोः+एकतरः+अन्यं / प्रहर्तुम्+आरभत)

तदा सः द्वितीयः अपि එකල්හි ඒ දෙවැන්නාත් तं तथा एव शीर्षाघातैः ඔහුට එසේ ම හිසින් පහර දීමෙන්

पृष्टतः प्रक्षेप्तुम् उद्यतः अभवत्। පිටිපසින් බැහැර කරන්නට උත්සාහවත් වූයේ ය.

(द्वितीयः+अपि / तथा+एव/ प्रक्षेप्तुम्+उद्यतः+अभवत)

एवं तयोः कलहः समुद्भूतः। මෙසේ ඔවුන්ගේ කලහය හටගත්තේ ය. (सम् +उद्भूतः)

तौ ඔවුහු දෙදෙනා परस्परं ඔවුනොවුන්ට शृङ्गाभ्यां दृढं प्राहरताम्। අං දෙකෙන් දැඩි ව පහර දුන්නෝ ය.

ततः අනතුරුව फलकात् [ඒදණ්ඩේ] ලෑල්ලෙන් तयोः एकतरस्य पश्चिमपदौ දෙදෙනාගෙන් එකකුගේ පසු පා දෙක सहसा एव भ्रष्टौ। එක්වර ම ගිලිහුණහ.

(सहसा+एव / तयोः+एकतरस्य

अधः पतन्तं පහළට වැටෙන්නා වූ तं प्रहरन् ඔහුට පහර දෙන්නා වූ असौ द्वितीयः अपि ඒ දෙවැන්නාත්

सेतोः च्युतः। ඒ දණ්ඩෙන් ගිලිහුනේ ය.

(तम्+अधः प्रहरन्+असौ द्वितीयः+अपि / सेतोः+च्युतः)

एवं මෙසේ तौ द्वौ अपि छागौ ඒ එළුවෝ දෙදෙනා ම तस्मिन् गभीरे जले पतितौ निमग्नौ च। ඒ ගැඹුරු ජලයෙහි වැටුණෝ ද, ගිලුණෝ ද වූහ.

(द्वौ+अपि)

अन्येद्युः किमप्यन्यदजद्वयं तेनैव मर्गेण परस्परविरुद्धां दिशमुद्दिस्य प्रस्थितम्। तावन्योन्यममिलतां सेतुमद्ये। तत्र स्थलाभावं वीक्ष्य तयोरेकतरो महतावधानेन तस्मिन् फलके शनैः शनैरुपाविशत्। ततः स द्वितीयस्तस्य शरीरे मन्दं मन्दं पदानि निधाय पारमगच्छत्। अनन्तरं स प्रथमोऽजः शनैरुत्थायात्मनो मर्गं सुखेनाक्रमत। एवं द्वावपि तौ छागौ नदीतटं क्षेमेण प्राप्नुताम्। विवेको विनयश्च न केवलं जातिमाश्रयतः किन्तु व्यक्तिविशेषमपि॥

**अन्येद्युः** අන් දිනක **किं अपि अन्यत् अजद्वयं** කිසියම් වෙනත් එළුවෝ දෙදෙනෙක් **तेन एव मर्गेण** එම මාර්ගයෙන් ම **परस्परविरुद्धां दिशम् उद्दिस्य** ඔවුනොවුන්ට විරුද්ධ වූ දිශා දෙසට **प्रस्थितम्।** පිටත් වූහ.

(किम्+अपि+अन्य+अजद्वयं / तेन+एव दिशम्+उद्दिस्य)

**तौ** ඒ එළුවෝ දෙදෙනා **सेतुमद्ये** ඒදණ්ඩ මැද **अन्योन्यम् अमिलताम्।** ඔවුනොවුන් මුණගැසුණහ.

(तावत्+अन्यः+अन्यम्+अमिलतां)

**तत्र स्थल अभावं वीक्ष्य** එහි [ගොඩ] බිමක් නොමැති බව දැක **तयोः एकतरः** ඔවුන් දෙදෙනාගෙන් එකෙක් **महता आवधानेन** මහත් වූ අවධානයෙන් **तस्मिन् फलके** ඒ [ඒදඬු] ලෑල්ලෙහි

**शनैः शनैः उपाविशत्।** සෙමින් සෙමින් වාඩිවිය.

(महता+अवधानेन / शनैः+उपाविशत्)

**ततः** ඉක්බිති **सः द्वितीयः** ඒ දෙවැන්නා **तस्य शरीरे** ඔහුගේ සිරුරෙහි **मन्दं मन्दं पदानि निधाय** හෙමින් හෙමින් පියවර තබා **पारम् अगच्छत्।** පරතෙරට ගියේ ය.

(द्वितीयः+तस्य / पारम्+अगच्छत्)

**अनन्तरं** අනතුරුව, **सः प्रथमः अजः** ඒ පළමු එළුවා **शनैः उत्थाय** සෙමින් නැගිට **अत्मनः मार्गं सुखेन आक्रमत।** තමන්ගේ ගමන පහසුවෙන් ගියේ ය.

(न+अन्तरं / प्रथमः+अजः शनैः+उत्थाय+आत्मनः / सुखेन+आक्रमत)

**एवं** මෙසේ **द्वौ अपि तौ छागौ** ඒ එළුවෝ දෙදෙනා ම **नदीतटं** ගං ඉවුරට **क्षेमेण प्राप्नुताम्।** කරදරයකින් තොර ව පැමිණියෝ ය.

**विवेकः च विनयः च** විවේකයත් හික්මීමත් හුදෙක් **केवलं जातिम् न आश्रयतः** [ තිරිසනුන් වශයෙන්වත් ] ජාතියකට පමණක් විශේෂ නොවන්නේ ය. **किन्तु व्यक्तिविशेषम् अपि।** (जातिम्+आश्रयतः/ व्यक्तिविशेषम्+अपि)

එසේ වුවත් චරිතය අනුව වෙනස් වන්නේ ය.

अभिनवापाठावली ०२ कथा ०३

<u>අර්ථ පරිවර්තනය</u>

## महान् विवादः।

මහා විවාදය

जन्मान्धानां स्पर्शेन्द्रियं प्रायः सुतीक्ष्णं भवतीति प्रसिद्धम्। परिचिताः क्रियाः कुर्वन्ति ते लीलयैव। विना स्खलनं च गच्छन्ति यष्टिसहायाः स्थानात् स्थानम्। आगामिनः पुरुषस्य पादाघातं श्रुत्वैव ते तं संविदते। केचिद् ग्रामिका अन्धा गा मेषान् वा इतस्ततो नयन्ति परिपालयन्ति च। अपरे नित्याभ्यासेनानुतिष्ठन्ति सौचिकस्यापि व्यापारम्।

जन्मान्धानां स्पर्शेन्द्रियं උපතින් අන්ධවූවන්ගේ ස්පර්ශ ඉන්ද්‍රිය प्रायः බොහෝ සෙයින්

सुतीक्ष्णं भवतीति प्रसिद्धम्। ඉතා තියුණු වේ යන්න ප්‍රසිද්ධයි.

(जन्म+अन्धानां / स्पर्श+इन्द्रयं / भवति+इति)

ते ඔවුහු परिचिताः क्रियाः පුරුදු වූ ක්‍රියාවෝ लीलयैव कुर्वन्ति। පහසුවෙන් ම කරති. (लीलया+एव)

स्खलनं विना පැකිලීමකින් තොර ව यष्टिसहायाः සැරයටිය සහාය කොට ඇති ඔවුහු च स्थानात् स्थानम् गच्छन्ति। තැනකින් [තවත්] තැනකට යති.

ते ඔවුහු आगामिनः पुरुषस्य पादाघातं පැමිණෙන පුරුෂයාගේ පා ගැටීම श्रुत्वैव අසා ම

तं संविदते। ඔහු [කවුරු දැයි] මනාව දැනගනිත්. (पाद+आघातं / श्रुत्वा+एव)

केचित् ग्रामिकाः अन्धाः කිසියම් ගැමි අන්ධයෝ गाः वा मेषान् वा ගවයන් හෝ බැටළුවන් හෝ

इतस्ततः नयन्ति परिपालयन्ति च। ඔබිනොබ ගෙනයති. පාලනය ද කරති.

अपरे අන්‍යයෝ नित्य अभ्यासेन නිතර පුහුණු කිරීමෙන් सौचिकस्य व्यापारम् अपि ඇඳුම් මහන්නාගේ ව්‍යාපාරය ද अनुतिष्ठन्ति । කරති. (नित्य+अभ्यासेन+अनुतिष्ठन्ति / सौचिकस्य+अपि)

अथ कस्मिंश्चिद् ग्रामे निवसन्ति स्म षडन्धाः। आत्मनः स्पर्शज्ञाने प्रवीण्यमुद्दिश्य सञ्जाता कदाचित् तेषामहमहमिका। ततस्तैरेवं प्रतिज्ञातम्। गजस्याकारं यः कोऽपि यथार्थं वर्णयति स एवास्मासु श्रेष्ठ इति। स्पर्शमात्रेणैवासौ हस्ती वर्णनीयः। न कस्याप्यन्यस्य साहाय्यं ग्रहीतव्यमिति। तदनुरोधात् तेऽन्धाः प्राप्ता गजस्य समीपम्। प्रथमो यावदुपसर्पति तावत्करिण उदरं सोऽस्पृशत्। ततः स उच्चैरवदत्। "अहो भित्तिरेवैषा दृश्यते। भित्तिरूपो ननु गजः" इति। द्वितीयेन धृतस्तस्य पशोः पादः उक्तं च। ''अहो स्थूलताऽस्य स्तम्भस्य। स्तम्भरूपः

खलु गजः इति''। तृतीयेन करे प्राप्तं हस्तिनो लाङ्गूलम्। तदाऽसावुदगिरत्। "आश्चर्यं भोः, रज्जुरेवेयमिति मन्ये। असंशयं रज्जुरूपोऽयं कुञ्जरः" इति।

अथ ඉක්බිත්තෙන් कस्मिंश्चिद् ग्रामे කිසියම් ගමක षडन्धाः निवसन्ति स्म। අන්ධයෝ සය දෙනෙක් වාසය කළහ.

आत्मनः තමන්ගේ स्पर्शज्ञाने प्रावीण्यम् उद्दिश्य ස්පර්ශය පිළිබඳ ඇති බුද්ධියෙහි ප්‍රවීණ බව උදෙසා,

(प्रवीण्यम्+उद्दिश्य)

कदाचित् කිසියම් දිනක तेषाम् ඔවුන්ගේ अहमहमिका सञ्जाता। අහමහමිකාරය [මම පළමු වෙමි මම පළමු වෙමි යන අදහස] හටගත්තේ ය. (तेषाम्+अहम्+अहम्+इका)

ततः අනතුරුව तैः एवं प्रतिज्ञातम्। ඔවුන් විසින් මෙසේ [ප්‍රතිඥා] පිළින දෙන ලදී. (ततः+तैः+एवं)

गजस्य आकारं ඇතාගේ ස්වරූපය यः कोऽपि යම් කිසිවෙක් यथार्थ वर्णयति නිවැරදිව ම වර්ණනා කරයි ද,

सः एव अस्मासु श्रेष्ठः इति। ඔහු ම අප අතර ශ්‍රේෂ්ඨ ය. යනුවෙනි.

गजस्य+आकारं / यथा+अर्थ / एव+अस्मासु)

स्पर्शमात्रेण एव ස්පර්ශ මාත්‍රයෙන් ම असौ हस्ती वर्णनीयः। මේ ඇතා වර්ණනා කටයුතුයි.

(स्पर्शमात्रेण+एव+असौ)

कस्य अपि කිසිවකුවත් अन्यस्य साहाय्यं न ग्रहीतव्यम् । අනිකාගේ සහාය නොගත යුතුයි. इति। යනුවෙනි.

(कस्य+अपि+अन्यस्य / ग्रहीतव्यम्+इति)

तदनुरोधात् ඒ නියමයෙන් [ක්‍රමයෙන්] ते अन्धाः ඒ අන්ධයෝ गजस्य समीपम् प्राप्ता। ඇතාගේ සමීපයට පැමිණියහ.

(तत्+अनुरोधात् / ते+अन्धाः)

प्रथमः පළමුවැන්නා यावत् उपसर्पति तावत् යම්තාක් එළඹේ ද ඒ තාක් सः ඔහු

करिणः उदरं अस्पृशत्। ඇතාගේ බඩ ස්පර්ශ කළේ ය. (यावत्+उपसर्पति / सः+अस्पृशत्)

ततः सः उच्चैः अवदत्। (उच्चैः+अवदत्)

ඉක්බිත්තෙන් හෙතෙම උස් හඬින් කීයේ ය.

"अहो පුදුමයි! एषा भित्तिः एव दृश्यते। මෙය බිත්තියක් මෙන් දක්නා ලැබේ.

भित्तिरूपः ननु गजः इति"। (भित्तिः+एव+एषा)

ඇතා බිත්තියට සමාන ස්වරූප ඇත්තේ නොවේ ද?

द्वितीयेन දෙවැන්නා විසින් तस्य पशोः पादः ඒ සතාගේ පය धृतः च उक्तं च। අල්වන ලද්දේ ද කියන ලද්දේ ද විය. (धृतः+तस्य)

''अहो अस्य स्तम्भस्य स्थूलता। (स्थूलता+अस्य)
පුදුමයි! මොහුට ටැඹක බඳු මහත බවක් පවතියි.
गजः स्तम्भरूपः खलु इति''। ඇතා ටැඹක් හා සමාන වේ.

तृतीयेन තෙවැන්නා විසින් करे අතෙහි हस्तिनः लाङ्गूलं प्राप्तम्। ඇතාගේ වල්ගය පැමිණියේ ය.

तदा එකල්හි असौ उदगिरत्। ඔහු කෑගැසී ය. " भोः! आश्चर्यम् පින්වත්නි, පුදුමයි! अयम् रज्जुः एव इति मन्ये। මෙතෙම රැහැනක් ම යැයි හඟිමි.
(तदा+असौ+उदगिरत् / रज्जुः+एव+अयम् +इति)

अयं कुञ्जरः මේ ඇතා असंशयं रज्जुरूपः නිසැකයෙන් ම රැහැනක ස්වරූප ඇත්තේ ය. इति। යනුවෙනි. (रज्जुरूपः+अयं)

चतुर्थो हस्तेन गृहीतवान् नागस्य कर्णम्। ससंभ्रमं तेनोद्घोषितम्। "हन्त विस्तृतमेतद्व्यजनम्। व्यजनरूपोऽयं मातङ्ग इति मे निश्चयः" इति। पञ्चमो गजस्य शुण्डामवलम्ब्य प्राख्यापयद् दीर्घस्वरेण। "अये, विशालोऽसौ सर्पोऽत्र विलुठति। अहिरूपोऽसौ करीति मे मतिः" इति। अन्ततः षष्ठोऽन्धस्तस्य वारणस्यरदं धृत्वानुच्चैरवदच्च। "अहो निशितः कठिनश्चायं शूलः शूलरूप एष द्विरद इति नात्र संशयः" इति। अनन्तरं ते सर्वे व्यावक्षत स्वमतं तारस्वरेण न चामन्यन्त परमतम्। तेन सुचिरं प्रावर्तत तेषां महान् विवादः। एवमपूर्वं किमपि तेषां निरीक्षणकौशलं ज्ञात्वा भृशं विनोदमन्वभवन् सर्वे ग्रामवासिनो जनाः।

( चतुर्थः සිවුවැන්නා नागस्य कर्णम् ඇතාගේ කණ हस्तेन गृहीतवान् । අතින් [අල්වා] ගත්තේ ය.

तेन ससंभ्रम् उद्घोषितम्। ඔහු විසින් වහා උද්ඝෝෂණය [ශබ්දයක්] කරන ලදී. (तेन+उद्घोषितम्)

"हन्त! පුදුමයකි! एतत् विस्तृतं व्यजनम्। මෙය පැතුරුණු විජිනිපතකි.

अयं मातङ्गः व्यजनरूपः इति මේ ඇතා විජිනිපතක ස්වරූප ඇත්තේ යැයි मे निश्चयः මගේ තීරණය යි.

इति।යනුවෙනි. (व्यजनरूपः+अयं)

पञ्चमः පස්වැන්නා गजस्य शुण्डाम् अवलम्ब्य ඇතාගේ සොඬවැල එල්බගෙන

दीर्घस्वरेण प्राख्यापयत्। දීර්ඝහඬින් කෑ ගැසී ය. (शुण्डाम् +अवलम्ब्य)

"अये, මහත්වරුනි, अत्र असौ विशालः सर्पः මෙහි මේ විශාල සර්පයා विलुठति। පෙරළෙයි.

( विशालः +असौ / सर्पः+अत्र)

**असौ करी** මේ ඇතා **अहिरूपः इति मे मतिः"।** සර්පයකු හා සමාන යයි මාගේ කල්පනාවයි.

(अहिरूपः+असौ)

**अन्ततः** අවසානයෙහි **षष्ठः अन्धः** සවැනි අන්ධයා **तस्य वारणस्य रदं** ඒ ඇතාගේ දළ **धृत्वान्** අල්වා

**उच्चैः अवदत् च।** උස් හඬින් කීයේ ය.

(षष्ठः+अन्धः+तस्य / धृत्वान् +उच्चैः+अवदत्+च)

"अहो! निशितः कठिनः अयं शूलः। (कठिनः+च+अयं)

ඔහෝ ! මේ මුවහත් කළ රළුවූ උලකි.

**एषः द्विरदः** මේ ඇතා **शूलरूपः इति** උලකට සමානයයි. **अत्र न संशयः"** මෙහි සැකයක් නැත්තේ ය.

**इति।** යනුවෙනි. (एष+द्विरद / न+अत्र)

**अनन्तरं** අනතුරුව **ते सर्वे** ඒ සියල්ලෝ ම **स्वमतं** සිය මතය **तारस्वरेण व्याचक्षत।** උස් හඬින් පැවසූහ.

**परमतं न च मन्यन्त।** අනෙකාගේ මතය අනුමත නොකළහ.

**तेन** එහෙයින් **सुचिरं** බොහෝ වෙලාවක් **तेषां महान् विवादः प्रावर्तत।** ඔවුන්ගේ මහත් විවාදය පැවතිණ.

एवम् මෙසේ अपूर्वं किम् अपि तेषां निरीक्षणकौशलं ज्ञात्वा,

පෙර නොවූ විරූ ඔවුන්ගේ නිරීක්ෂණ දක්ෂ බව දැන,

**सर्वे ग्रामवासिनः जनाः** සියලු ගම්වැසි ජනයෝ **भृशं विनोदम् अन्वभवन्।** බෙහෙවින් විනෝදය භුක්තිවින්දහ.

(एवम्+अपूर्वं / किम्+अपि / विनोदम्+अनु+अवभवन्)

अभिनवापाठावली ०२ कथा १३

<u>අර්ථ පරිවර්තනය</u>

**विरम, विरम रे शठ।**

නවතව නවතව කොල කපටිය

आसीत् कस्मिंश्चिन्नगरे कथाप्रियो नाम कोऽपि राजा। राज्यकार्ये उदासीनोऽसौ विनोदेन कालमनयत् स्तुतिपाठकैः सह सततम्। प्रत्यहं नूतनः कश्चित्पुरुषः कथयति नृपतयेऽभिनवां कथाम्। कथाश्रवणेन हृष्टः स भूपश्च तस्मै प्रयच्छति बहुमूल्यं पारितोषिकम्। एकस्मिन् दिने रम्या काचित्कथा तेन श्रुता। किन्तु सा सत्वरमेव समाप्तेति स विषण्णोऽभवत्। तदा क्रोधवशात्तेनेदमुक्तम्। यः कोऽपि सुदीर्घां कथां कथयिष्यति तस्मै प्रदास्यामि राज्यार्धमात्मनः कन्यां च। परं यस्य कथा शीघ्रमेव समाप्तिं यास्यति तस्य शिरश्छेत्स्यामीति।

कस्मिंश्चित् नगरे कथाप्रियः नाम कः अपि राजा आसीत्।
කිසියම් නගරයක කථාප්‍රිය නම් කිසියම් රජෙක් වී ය.

**राज्यकार्ये उदासीनः असौ** රාජකාර්‍යයෙහි උදාසීන වූ මෙතෙම **स्तुतिपाठकैः सह** වන්දිභට්ටයන් සමග

**सततं** නිතර **विनोदेन कालम् अनयत्** විනෝදයෙන් කාලය ගෙව්වේ ය. (उदासीनः+असौ / कालम्+अनयत्)

**नूतनः कश्चित्पुरुषः** අලුත් කිසියම් පුරුෂයෙක් **प्रत्यहं** දිනපතා

**नृपतये अभिनवां कथां कथयति ।** රජුට අලුත් කථා පුවතක් කියයි. ( नृपतये+अभिनवां)

**कथाश्रवणेन हृष्टः सः भूपः च** කථා ඇසීමෙන් සන්තෝෂ වූ ඒ රජු ද **तस्मै** ඔහුට

**बहुमूल्यं पारितोषिकं** බොහෝ වටිනා වැටුපක් **प्रयच्छति ।** දෙයි. ( भूपः+च)

**एकस्मिन् दिने** එක් දිනක් **रम्या काचित्कथा तेन श्रुता।** සිත්කළුවූ කිසියම් කථාවක් ඔහු විසින් අසන ලදී.

**किन्तु** එසේ වුවත් **सा सत्वरं एव समाप्ता इति** එය ඉක්මනින් ම අවසන් වූයේ යැයි

**सः विषण्णः अभवत्।** ඒ රජ කළකිරුණේ වී ය. ( सत्वरम्+एव / समाप्ता+इति / विषण्णः+अभवत्)

**तदा** එකල්හි **तेन** ඒ රජු විසින් **क्रोधवशात् इदम् उक्तम्।** ක්‍රෝධයෙන් මෙය කියන ලදී.

(क्रोधवशात्+तेन+इदम्+उक्तम्)

**यः कः अपि** යම් කිසිවෙක් **सुदीर्घां कथां कथयिष्यति** ඉතා දික් වූ කථාවක් කියන්නේ ද **तस्मै** ඔහුට **राज्यार्धम् च आत्मनः कन्यां च** රජයෙන් කොටසක් ද තමන්ගේ දියණිය ද **प्रदास्यामि।** දෙන්නෙමි. [යනුවෙනි.]

( राज्य+अर्धम्+अत्मनः)

**परं** නමුත් **यस्य कथा** යමකුගේ කථාව **शीघ्रम् एव समाप्तिं यास्यति** ඉක්මනින් අවසන් වන්නේ ද

**तस्य शिरः छेत्स्यामि इति।** ඔහුගේ හිස සිඳමි යැයි. ( शिरः+छेत्स्यामि+इति )

ततः प्रथमेन कथयित्रादिनान्तं कथिता हास्यरसेन पूर्णाऽख्यायिका। किन्तु यदाऽसौ समाप्ता तदा रोषवशात्स राजा तस्य वधमकारयत्। द्वितीयः पण्डितो दिनद्वयपर्यन्तमवर्णयद्विररसेन युक्तां कांचित्कथाम्। परमवसन्नायामेव

तस्यां तस्य शिरश्छिन्नमभवत्। तृतीयाद्वक्तुः करुणरसप्रधाना कथा श्रुताऽमुना राज्ञा। चत्वारि दिनानि व्यतीतानि तस्याः श्रवणेन। किन्तु कथायाः कथकप्राणानां च समाप्तिः समकालिकैवासीत्। ततः कश्चिद्धूर्तो युवा कथामेतां कथयितुं प्रारभत।

ततः ඉක්බිත්තෙන් प्रथमेन कथयित्रा පළමුවැනි කථිකයා විසින් दिनान्तं දිනය අවසාන වනතුරු
हास्यरसेन पूर्णा आख्यायिका कथिता। සිනා රසයෙන් පිරුණු ආඛ්‍යායිකාවක් කියන ලදී.
( दिन+अन्तं / पूर्ण+अख्यायिका)
किन्तु එසේ වුවත් यदा असौ समाप्ता तदा रोषवशात् යම් කලක [කථාව] වූයේ ද එකල්හි කෝපාවේශයෙන්
सः राजा तस्य वधम् अकारयत्। ඒ රජු ඔහුට මරණය කරවී ය. ( यदा+असौ / वधम् +अकारयत्)
द्वितीयः पण्डितः දෙවැනි පණ්ඩිතයා दिनद्वयपर्यन्तं දින දෙකක් අවසන් වන තුරු
वीररसेन युक्तां कांचित् कथां अवर्णयत् । වීර රසයෙන් යුතු වූ කිසියම් කථාවක් වර්ණනා කළේ ය.
( दिनद्वयपर्यन्तम्+अवर्णयत्+वीररसेन )
परं එනමුත් तस्यां अवसन्नायाम् एव ඒ කථාව අවසාන කළ කල්හි ම,
तस्य शिरः छिन्नम् अभवत्। ඔහුගේ හිස සිඳින ලද්දේ විය. ( परम्+अवसन्नायाम्+एव / शिरः+छिन्नम्+अभवत्)
अमुना राज्ञा මේ රජු විසින් तृतीयात् वक्तुः තුන්වැනි කථිකයාගෙන්
करुणरसप्रधाना कथा श्रुता। කරුණ රසය ප්‍රධාන වූ කථාවක් අසන ලදී. ( तृतीयात् +वक्तुः श्रुता+अमुना)
तस्याः श्रवणेन ඒ කථාව ඇසීමෙන් चत्वारि दिनानि व्यतीतानि। දින සතරක් ඉක්ම ගියාහු ය.
किन्तु එසේ වුවත් कथायाः च कथकप्राणानां च समाप्तिः කථාවන්ගේ ද කථක ජීවිතයන්ගේ ද නිමාව
समकालिकैः एव आसीत्। එක ම කාලයෙහි ම වීය. (समकालिक+एव+आसीत्)
ततः ඉක්බිති कश्चित् धूर्तः युवा කිසියම් කපටි තරුණයෙක්
एतां कथां कथयितुं प्रारभत। මේ කථාව කියන්නට පටන් ගත්තේ ය.( कश्चित्+धूर्तो / कथाम्+एतां)

“आसीत् कोऽपि महान् धनिकः कस्मिंश्चिन्नगरे। चत्वारः पुत्रा द्वे कन्ये च तस्यासन्। विशालं धान्यागारमासीत्तस्य धनिकस्य। कस्मिंश्चिद् दिने तस्यानाच्छादितं विवरं दृष्ट्वा कश्चन चटक आगतो धान्यकणं च गृहीतवान्। अनन्तरं कोऽप्यन्यः खग आगतो धान्यकणं च गृहीतवान्। ततः कश्चिदपरः खग आगतो धान्यकणं च गृहीतवान्।

**कस्मिंश्चित् नगरे** කිසියම් නගරයක **कः अपि महान् धनिकः आसीत्।** කිසියම් මහා ධනවතෙක් විය.

**तस्य** ඔහුට **चत्वारः पुत्राः द्वे कन्ये च** පුත්‍රයෝ සතර දෙනෙක් ද දූවරු දෙදෙනෙක් ද

**आसन्।** වූහ. (तस्य+असन्)

**तस्य धनिकस्य** ඒ ධනවතාට **विशालं धान्यागारम् आसीत्।** විශාල ධාන්‍යාගාරයක් [ද] විය.

(धान्यागारम्+असीत्+तस्य)

**कस्मिंश्चित् दिने** කිසියම් දිනක **तस्य अनाच्छादितं विवरं दृष्ट्वा** ඒ ධාන්‍යාගාරයෙහි නොවසන ලද විවරයක් දැක, **कश्चन चटकः आगतः** කිසියම් ගේකුරුල්ලෙක් පැමිණියේ

**धान्यकणं च गृहीतवान्।** ධාන්‍ය කැබැල්ලක් ද ගත්තේ ය. (तस्य+अनाच्छादितं)

**अनन्तरं** ඉක්බිත්තෙන් **कः अपि अन्यः खगः आगतः** කිසියම් අන් පක්ෂියෙක් ආයේ

**धान्यकणं च गृहीतवान्।** ධාන්‍ය කැබැල්ලක් ද ගත්තේ ය. (कः+अपि+अन्यः)

**ततः** අනතුරුව **कश्चित् अपरः खगः आगतः** කිසියම් වෙනත් පක්ෂියෙක් ආයේ

**धान्यकणं च गृहीतवान्।** ධාන්‍ය කැබැල්ලක් ද ගත්තේ ය. (कश्चित् +अपरः)

कथाप्रियः - श्रुतमेतदवगतं च। ततस्ततः।

युवा - देव, अनन्तरं कोऽप्यन्यः खग आगतो धान्यकणं च गृहीतवान्।

कथाप्रियः - ज्ञातमेतद्। अन्यत् किमपि कथय।

युवा - अनन्तरं कश्चिदन्यः खग आगतो धान्यकणम् च गृहीतवान्।

कथाप्रियः - भवत्वेतद्। रे मूर्ख, किमन्यत् कथयितव्यमस्ति?

युवा - अनन्तरमन्यः कोऽपि खग आगतो धान्यकणं च गृहीतवान्।

कथाप्रियः - ननु मूढमते, कथय कथायाम् अपरं भागम्। किमर्थं पुनः पुनः कर्णकटु प्रजल्पसि एकमेव वाक्यम् ?

युवा - देव विशालं तद्धान्यागारम्। तस्मात् सर्वान् धान्यकणान् खगाः कथं नीतवन्तदेकैकशः कथनीयम्। पश्चाद्धनिकस्य कुमाराणां पराक्रमाः कुमारीणां च चातुर्यं वर्णनीयम्। शृणोतु महाराजः। "अनन्तरं कोऽप्यन्यः खग आगतो धान्यकणं च गृहीतवान्।"

कथाप्रियः - विरम, विरम रे शठ। न श्रोतुमिच्छामि नीरसामिमां कथाम्।

युवा - यच्छतु महाराजस्तर्हि राज्यार्धं स्वकन्यां च मह्यम्। जिता भवतः प्रतिज्ञा मया।

कथाप्रियः – (चिरं विचार्य) सत्यमेतद्। का वा गतिः। गृहाण मे राज्यार्धं कन्यां च। जीतोऽस्मि खलु त्वया।

**कथाप्रियः** – කථාප්‍රිය රජ - **एतत् श्रुतम् अवगतं च।** මෙය [දැන්[ අසන ලදී. දන්නා ද ලදී.

**ततस्ततः।** ඉතින් ඉතින් (**श्रुतमेतत्+अवगतं**)

**युवा** – තරුණයා - **देव,** දේවයන් වහන්ස, **अनन्तरं कः अपि अन्यः खगः आगतः** අනතුරුව කිසියම් අනෙක් පක්ෂියෙක් ආයේ **धान्यकणं च गृहीतवान्।** ධාන්‍ය කැබැල්ලක් ද ගත්තේ ය. (**कः+अपि+अन्यः**)

**कथाप्रियः** – කථාප්‍රිය රජ - **एतत् ज्ञातम्।** මෙය දන්නා ලදී. **अन्यत् किम् अपि कथय।** අන් කිසිවක් කියව!

(**ज्ञातम्+एतत् / किम् अपि**)

**युवा**– තරුණයා - **अनन्तरं** අනතුරුව **कश्चित् अन्यः खगः आगतः** කිසියම් වෙන පක්ෂියෙක් ආයේ **धान्यकणं च गृहीतवान्।** ධාන්‍ය කැබැල්ලක් ද ගත්තේ ය. (**कश्चित्+अन्यः**)

**कथाप्रियः** – කථාප්‍රිය රජ- **एतत् भवतु।** එය [එසේ] වේවා! **रे मूर्ख,** මෝඩයො **किम्** කිම?

**अन्यत् कथयितव्यम् अस्ति?** අන් කියයුතු දෙයක් ඇත්තේ ද? (**भवतु+एतत् / किम्+अन्यत् / कथयितव्यम् +अस्ति**)

[තරුණයා කියයි.]

**युवा** –තරුණයා - **अनन्तरम्** අනතුරුව **अन्यः कः अपि खगः आगतः** වෙනත් පක්ෂියෙක් ආයේ **धान्यकणं च गृहीतवान्।** ධාන්‍ය කැබැල්ලක් ද ගත්තේ ය. (**अनन्तरम्+अन्यः**)

**कथाप्रियः** – කථාප්‍රිය රජ - **ननु मूढमते,** එම්බා මෝඩ තැනැත්ත,

**कथायां अपरं भागं कथय।** කථාවගේ අනෙක් කොටස කියව!

**किमर्थं** කවර ප්‍රයෝජනයකට **कर्णकटुः** කණට කටුක වූ

**एकम् एव वाक्यं पुनः पुनः प्रजल्पसि?** එකම වාක්‍යයන් නැවත නැවත දොඩන්නෙහි ද? (**किम्+अर्थं एकम्+एव**)

**युवा** – තරුණයා - **देव** දේවයන් වහන්ස, **तत् धान्यागारं विशालम्।** ඒ ධාන්‍යාගාරය විශාල ය.

**तस्मात्** එහෙයින් **सर्वान् धान्यकणान्** සියලු ධාන්‍ය කැබලි **खगाः कथं नीतवन्तः** පක්ෂීහු කෙසේ ගෙන ගියේදැයි **एक एकशः कथनीयम्।** එක එක බැගින් කිය යුතුයි. (**नीतवन्तः+एक+एकशः**)

**पश्चात्** පසුව **धनिकस्य कुमाराणां पराक्रमाः च** ධනවතාගේ කුමරුන්ගේ පරාක්‍රම ද

**कुमारीणां चातुर्यं च वर्णनीयम्।** කුමරියන්ගේ දක්ෂබව ද වර්ණනා කළයුතු යි. **( पश्चात्+धनिकस्य)**

**शृणोतु महाराजः!** අසන්න මහරජුනි, **"अनन्तरं कः अपि अन्यः खगः आगतः** අනතුරුව කිසියම් පක්ෂියෙක්

ආයේ **धान्यकणं च गृहीतवान्।"** ධාන්‍ය කැබල්ලක් ද ගත්තේ ය.

**कथाप्रियः –** කථාප්‍රිය රජ - **विरम, विरम रे शठ।** නවතපං නවතපං මෝඩයො

**इमां नीरसां कथां श्रोतुम् न इच्छामि** මේ නීරස [වූ] කථාව අසන්නට නොකැමැත්තෙමි.

**( श्रोतुम्+इच्छामि नीरसां+इमां)**

**युवा –** තරුණයා - **तर्हि महाराज** එසේ වී නම් මහරජ **राज्यार्धं च स्वकन्यां च मह्यम् यच्छतु।** රාජ්‍යයෙන් අඩක් ද සිය දියණිය ද මට දෙනු ලැබේවා! [යනුවෙන් පැවසීය.] **( महाराजः+तर्हि / राज्य+अर्धम्)**

**भवतः प्रतिज्ञा मया जिता।** ඔබවහන්සේගේ පිළින මා විසින් දිනන ලදී.

**कथाप्रियः –** කථාප්‍රිය රජ - **(चिरं विचार्य)** [බොහෝ වේලාවක් කල්පනා කොට]

**एतत् सत्यम्** මෙය සත්‍යයකි. **का वा गतिः।** [අහෝ] කවර නම් අවාසනාවක් ද? **( सत्यम् +एतद्)**

**मे राज्यार्धं च कन्यां च गृहाण।** මාගේ රාජ්‍යයෙන් අඩක් ද දුව ද ගනුව.

**त्वया खलु जीतः अस्मि। ( जीतः+अस्मि)**

[එහෙනම්] නුඹ විසින් වනාහි දිනන ලද්දෙහි ය.

अभिनवापाठावली ०२ कथा २३

<u>අර්ථ පරිවර්තනය</u>

## नूनं सौवर्णदीनारपूर्णोऽयं वाल्मीकः।

ඒකාන්තයෙන් ම මෙය රන්මසු පිරුණ තුඹසකි.

अस्ति कस्मिंश्चिदधिष्ठाने हरिदत्तो नाम ब्राह्मणः। तस्य च कृषिं कुर्वतः सदैव निष्पलः कालोऽतिवर्तते। अथैकस्मिन्दिवसे स ब्राह्मण उष्णकालावसाने घर्मार्तः स्वक्षेत्रमध्ये वृक्षच्छायायां प्रसुप्तोऽनतिदूरेवल्मीकोपरि प्रसारितं बृहत्फटायुक्तं भीषणं भुजङ्गमं दृष्ट्वा चिन्तयामास। नूनमेषा क्षेत्रदेवता मया कदाचिदापि न पूजिता। तेनेदं मे कृषिकर्म विफली भवति। तदस्या अहं पूजामद्य करिष्यामि। इत्यवधार्य, कुतोऽपिक्षिरं याचित्वा शरावे निक्षिप्य

वल्मीकान्तिकमुपगत्योवाच- ''भोः क्षेत्रपाल! मयैतावन्तं कालं न ज्ञातं यतत्वमत्र वससि। तेन पूजा न कृता। तत्साम्प्रतं क्षमस्व'' इति। एवमुक्त्वा दुग्धं च निवेद्य गृहाभिमुखं प्रायात्।

कस्मिंश्चित् अदिष्ठाने එක්තරා ප්‍රදේශයක हरिदत्तः नाम ब्राह्मणःහරිදත්ත නම් බමුණෙක් अस्ति। ඇත.

कालः अतिवर्तते कुर्वतः කාලය ඉක්මවා කරන ලද तस्य कृषिं ඔහුගේ කෘෂිකර්මාන්තය

सदैव निष्पलः। හැමදාම නිෂ්ඵල ය.

अथ एकस्मिन् दिवसे ඉක්බිති එක් දවසක सः ब्राह्मणःඒ බමුණා उष्णकालावसाने घर्मार्तः උෂ්ණ කාලය අවසානයෙහි මධ්‍යාහ්න සමයේ स्वक्षेत्रमध्ये තම කුඹුර මැද वृक्षच्छायायां प्रसुप्तः।ගස් සෙවණක නිදා ගත්තේ,

न अतिदूरे ඉතා නුදුරෙහි वल्मीकः उपरि තුඹස මතුයෙහි प्रसारितं बृहत्फटायुक्तं විහිදුවන ලද මහත් හිස ඇති भीषणं भुजङ्गमं दृष्ट्वा දරුණු නාගයකු දැක चिन्तयामास। සිතී ය.

नूनं एषा क्षेत्रदेवता ඒකාන්තයෙන් මොහු කුඹුරට අධිපති දෙවියා යි. मया कदाचित् अपि न पूजिता। මා විසින් කිසිම දිනක [මොහු] නොපුදන ලදී.

तेन එහෙයින් मे इदं कृषिकर्म विफली भवति। මාගේ මේ ගොවිතැන නිසරු වෙයි.

तदस्या එහෙයින් अहं अद्य पूजां करिष्यामि। මම අද [මොහු ව] පුදන්නෙමි.

इति अवधार्य යනුවෙන් සලකා कुतः अपि क्षिरं याचित्वा කොහෙන් හෝ කිරි ඉල්ලා

शरावे निक्षिप्य භාජනයක දමා वल्मीकान्तिकम् उपगम्य තුඹස සමීපයට එළඹ उवाच। කීවේ ය.

भोः ! क्षेत्रपाल, පින්වත් ක්ෂෙත්‍රාධිපතිය, मया एतावन्तं कलं මා විසින් මෙපමණ කාලයක්

यत् त्वं अत्र वससि न ज्ञातम्। මෙහි ඔබ වසන්නෙහි යැයි නොදන්නා ලදී.

तेन पूजा न कृता। එහෙයින් පූජා නොකරන ලදී. तत् सांप्रतं क्षमस्व इति। එමනිසා දැන් ඉවසන්න යැයි.

एवं च उक्त्वा මෙසේ ද කියා दुग्धं निवेद्य කිරි පුදා गृहाभिमुखं प्रायात्। නිවස වෙත ගියේ ය.

अथ प्रातर्यावदागत्य पश्यति तावद्दीनारमेकं शरावे दृष्टवान्। एवं च प्रतिदिनमेकाकी समागत्य तस्मै क्षीरं ददाति, एकैकञ्च दीनारं गृह्णाति। अथैकस्मिन् दिवसे वाल्मीके क्षीरनयनाय पुत्रं निरूप्य ब्राह्मणो ग्रामान्तरं जगाम। पुत्रोऽपि क्षीरं तत्र नीत्वा संस्थाप्य च पुनर्गृहं समायातः। दिनान्तरे तत्र गत्वा दीनारमेकं च दृष्ट्वा गृहीत्वा च चिन्तितवान्। ''नूनं सौवर्णदीनारपूर्णोऽयं वाल्मीकः''। तदेनं हत्वा सर्वमेकवारं ग्राहीष्यामि। ''इत्येवं सम्प्रदार्यान्येद्युः क्षीरं ददता ब्राह्मणपुत्रेण सर्पो लगुडेन शिरसि ताडितः। ततः कथमपि दैववशादमुक्तजीवित एव

रोषात्तमेवतीव्रविषादशनैस्तथादशत् यथा स सद्यः पञ्चत्वमुपागतः। स्वजनैश्च नातिदूरे क्षेत्रस्य काकाष्ठसंचयैः संस्कृतः। अथ द्वितीयदिने तस्य पिता समायातः। स्वजनेभ्यः सुतविनाशकारणं श्रुत्वा तथैव समर्थितवान्।

अथ ඉක්බිති प्रातः උදෑසන यावत् आगत्य पश्यति तावत् යම්තාක් පැමිණ බලයි ද ඒතාක්

एकं दीनारं රන් මස්සක් शरावे दृष्टवान्। භාජනයෙහි දුටුවේ ය.

एवं මෙසේ प्रतिदिनं च දිනපතා ම एकाकि समागत्य तस्मै क्षीरं ददाति। තනිව ම පැමිණ ඔහුට කිරි දෙයි.

एकैकं दीनारं च गृह्णाति। එක් එක් රන් මස්සක් ද ගනු ලබයි.

अथ एकस्मिन् दिवसे ඉක්බිති එක් දවසක वल्मीके क्षीरनयनाय पुत्रान् निरूप्य තුඹස වෙත කිරි ගෙන යෑම පිණිස පුතා යොදවා ब्राह्मणः ग्रामान्तरं जगाम। බමුණා වෙනත් ගමකට ගියේ ය.

पुत्रः अपि පුතුයා ද तत्र क्षीरं नीत्वा संस्थाप्य च එහි කිරි ගෙන ගොස් තබා

पुनः गृहं समायातः। ආපසු නිවසට පැමිණියේ ය.

दिनान्तरे तत्र गत्वा एकं दीनारं च दृष्ट्वा දිනය අවසන එහි ගොස් රන් මස්ස ද දැක

गृहीत्वा च चिन्तितवान्। [එය ද] රැගෙන [මෙසේ] සිතී ය.

“नूनं अयं सौवर्णदीनारपूर्णः वाल्मीकः। ඒකාන්තයෙන් මේ රන්මසු පිරුණු තුඹසකි.

तत् එහෙයින් एनं हत्वा सर्वं एकवारं ग्राहीष्यामि। මූ මරා සියල්ල එකවර ගන්නෙමි.

इति एवं सम्प्रधार्य යනුවෙන් මෙසේ සලකා अन्येद्युः අන් දිනක क्षीरं ददता ब्राह्मणपुत्रेण කිරි දෙන්නා වූ බ්‍රාහ්මණ පුතුයා විසින් सर्पः लगुडेन शिरसि ताडितः। පොල්ලකින් සර්පයාගේ හිස මත තලන ලදී.

ततः कथं अपि අනතුරු ව කෙසේ හෝ दैववशात् मुक्तजीवितं एव දෛවය නිසා මිදුණු දිවි ඇත්තේ ම

तथा रोषात् एव එසේ කෝපයෙන් ම तीव्रविषात् दशनैः अदशत् । [ඒ නාගයා] දරුණු විෂ දත්වලින් දෂ්ට කළේ ය.

यथा යම් සේ सः सद्यः पञ्चत्वमुपागतः। ඔහු වහා ම මිය ගියේ ය.

स्वजनैः च සිය ඥාතිජනයා විසින් ද क्षेत्रस्य नातिदूरे काष्ठसंचयैः संस्कृतः। කෙතට ඉතා නුදුරෙහි ම දර සෑයක දවන ලද්දේ ය.

अथ द्वितीयदिने ඉක්බිති දෙවෙනි දවසේ तस्य पिता समायातः। ඔහුගේ පියා පැමිණියේ ය.

स्वजनेभ्यः सुतविनाशकारणं श्रुत्वा සිය ඥාතීන්ගෙන් පුතු මරණයට පත් වූ කරුණ අසා

तथा एव समर्थितवान्। එසේ ම පිළිගත්තේ ය.

අර්ථ පරිවර්තනය

## सर्वं वै मूर्खमण्डलम्।

සියල්ලෝ ම මෝඩ මණ්ඩලයකි.

अस्ति कस्मिंश्चित्पर्वतैकदेशे महान्वृक्षः। तत्र च सिम्भुक नाम कोऽपि पक्षी प्रतिवसति स्म। तस्य पुरीषे सुवर्णमुत्पद्यते। अथ कदाचित्तमुद्दिश्य व्याधः कोऽपि समाययौ। स च पक्षी तदग्रत एव पुरिषमुत्ससर्ज। अथ पातसमकालमेव तत्सुवर्णीभूतं दृष्ट्वा व्याधो विस्मयमगमत्। "अहो! मम शिशुकालादारभ्य शकुणिबन्धव्यसनिनोऽशीतिर्वर्षाणि समभूवन्, न च कदाचिदापि पक्षीपुरीषे सुवर्णंदृष्टम्"। इति विचिन्त्य तत्र वृक्षे पाशं बबन्ध। अथासावपि पक्षी मूर्खस्तत्रैव विश्वस्तचित्तो यथापूर्वमुपविष्टस्तत्कालमेव पाशेन बद्धः। व्याधस्तु तं पाशादुन्मुच्य पञ्जरके संस्थाप्य निजावासं नीतवान्।

कस्मिंश्चित् पर्वत एकदेशे महान्वृक्षः अस्ति। කිසියම් පර්වත ප්‍රාන්තයක විශාල ගසක් ඇත.

तत्र च එහි ද सिम्भुक नाम कः अपि पक्षि සිම්මුක නම් කිසියම් පක්ෂියෙක් प्रतिवसति स्म। වාසය කළේ ය.

तस्य पुरीषे सुवर्णम् उत्पद्यते। ඔහුගේ අසූචිවල රත්තරන් උපදී

अथ कदाचित् ඉක්බිති කිසියම් දිනෙක तं उद्दिश्य ඌ උදෙසා कः अपि व्याधः කිසියම් වැද්දෙක් [එහි] समाययौ। පැමිණියේ ය.

सः पक्षी च ඒ පක්ෂියා ද तत् अग्रतः एव ඔහුගේ ඉදිරිපිට ම पुरिषम् उत्ससर्ज। අසූචි පහකළේ ය.

अथ ඉක්බිති पातसमकालं एव වැටෙන කල්හි ම तत् सुवर्णीभूतं दृष्ट्वा එය රත්තරන් වනු දැක

व्याधः विस्मयम् अगमत् । වැද්දා පුදුමයට පත්විය.

"अहो ! අනේ ! मम शिशुकालात् आरभ्य මාගේ බාල කාලයේ සිට शकुणिबन्धव्यसनिनः अशीतिर्वर्षाणि समभूवन्।

පක්ෂීන් ඇල්ලීම කරන්නේ අසූ වියපත් වීමි.

कदाचित् आपि पक्षीपुरीषे सुवर्णं न च दृष्टम्।
කිසිදිනක පක්ෂි  අසුචිවල රත්තරන් නොදක්නා ලදී.
इति विचिन्त्य යනුවෙන් කල්පනා කොට तत्र वृक्षे पाशं बबन्ध। ඒ ගසෙහි මද්දක් බැන්දේ ය.

अथ असौ मूर्खः पक्षी अपि ඉක්බිති මේ මෝඩ පක්ෂියා ද तत्र एव विश्वस्तचित्तः එහි ම විශ්වාස වූ සිත් ඇත්තේ यथापूर्वः उपविष्टः පෙර පරිදි පිවිසුණේ तत्कालं एव पाशेन बद्धः। එකල්හි ම මළපුඩුවෙන් බැඳිණි.

व्याधः तु වැද්දා වනාහි तं ඌ पाशात् उन्मुच्य पञ्जरके संस्थाप्य මද්දෙන් මුදවා කූඩුවෙහි තබා
निज आवासं नीतवान्। සිය නිවසට ගෙන ගියේ ය.

अथ चिन्तयामास - 'किमनेन साऽपायेन पक्षिणाहं करिष्यामि? यदि कदाचित्कोऽप्यमूमीदृशं ज्ञात्वा राज्ञे निवेदयिष्यति, - तन्नूनं प्राणसंशयो मे भवेदतः स्वयमेव पक्षिणं राज्ञे निवेदयामि" इति विचार्य तथैवाऽनुष्टितवान्। अथ राजापि तं पक्षिणं दृष्ट्वा विकसितनयनवदनकमलः परां तुष्टिमुपागतः। प्राह चैवम् -"हंहो ! रक्षापुरुषाः ! एनं पक्षिणं यत्नेन रक्षत। अशपानादिकं चास्य यथेच्छं प्रयच्छत " अथ मन्त्रिणाऽभिहितम् 'किमनेनाश्रद्धेयव्याधवचनप्रत्ययमात्रपरिगृहीतेन अण्डजेन? किं कदाचित्पक्षिपुरीषे सुवर्णं संभवति? तन्मुच्यतां पञ्जरबन्धनादयं पक्षी। इति मन्त्रिवचनाद्राज्ञा मोचितोऽसौ पक्ष्युन्नतद्वारतोरणे समुपविश्य सुवर्णमयीं विष्टां विधाय-

पूर्वन्तावदहं मूर्खो द्वितीयः पाशबन्धकः।
ततो राजा च मन्त्री च सर्वं वै मूर्खमण्डलम्॥ इति श्लोकं पठित्वा यथासुखमाकाशमार्गेन प्रायात्।

अथ चिन्तयामास ඉක්බිති [මෙසේ] සිතී ය. 'अनेन साऽपायेन पक्षिणा මේ විපත්තිදායක පක්ෂියා කරණකොට अहं किं करिष्यामि? මම කුමක් කරන්නෙම් ද?

यदि कदाचित् ඉදින් කිසිකලෙක कः अपि ईदृशं अमुं ज्ञात्वा කිසිවෙක් මෙබඳු මොහු [පිළිබඳ ව] දැනගෙන राज्ञे निवेदयिष्यति। රජු වෙත දන්වන්නේ ය.

तत् එවිට नूनं मे प्राणसंशयः भवेत् । ඒකාන්තයෙන් මගේ ජීවිතය පිළිබඳ සැකය [ද] වන්නේ ය.

अतः එහෙයින් स्वयं एव තෙමේ [මම] ම पक्षिणं [මේ] පක්ෂියා ගැන राज्ञे निवेदयामि। රජු වෙත දන්වමි.

इति विचार्य මෙසේ කල්පනා तथा एव अनुष्टितवान्। කොට එසේ ම කළේ ය.

अथ राजा अपि ඉක්බිති රජු ද तं पक्षिणं दृष्ट्वा ඒ පක්ෂියා දැක विकसितनयनवदनकमलः පිබිදුණු ඇස් හා මුව පියුම් ඇත්තේ परां तुष्टिम् उपागतः। අධිකතර සතුටට පැමිණියේ ය.

**एवं च प्राह** මෙසේ ද කීවේ ය. “**हंहो ! रक्षापुरुषाः !** ඒයි, රැකවලුනි! **एनं पक्षिणं यत्नेन रक्षत।** මේ පක්ෂියා උත්සාහයෙන් රකිව්!

**अशपानादिकं च** ආහාරපානාදිය ද **अस्य** මොහුට **यथा इच्छं** යම් සේ කැමති ද [එසේ] **प्रयच्छत** ” දෙව්!

**अथ** ඉක්බිති **मन्त्रिणा अभिहितम्।** මන්ත්‍රීවරයකු විසින් කියන ලදී.

**अनेन** මේ **अश्रद्धेयव्याधवचनप्रत्ययमात्रपरिगृहीतेन** අවිශ්වාසවන්ත [සත්ත්වඝාතකයාගේ] වැද්දාගේ වචනය පිළිගන්නා **अण्डजेन** ‘**किम्?** බිජුවටින් උපන් පක්ෂියාගෙන් කවර ප්‍රයෝජනයක් ද?

**किं** කිම **कदाचित्** කිසි කලෙක **पक्षिपुरीषे सुवर्णं संभवति?** පක්ෂි අසූචිවල රත්රන් හටගනියි ද?

**तत्** එහෙයින් **अयं पक्षी** මේ පක්ෂියා **पञ्जरबन्धनात् मुच्यताम्।** කුඩුවෙහි බැඳුමෙන් මුදනු ලැබේවා.

**इति** යනුවෙන් [පවසන ලද] **मन्त्रिवचनात्** මන්ත්‍රී වචනයෙන් **राज्ञा असौ मोचितः।** රජු විසින් ඌ මුදවන ලදී.

**पक्षी** පක්ෂියා **उन्नतद्वारतोरणे समुपविश्य** උස් වූ දොරටු තොරණෙහි මනාව හිඳ

**सुवर्णमयीं विष्टां विधाय,** ස්වර්ණමය වූ අසුචි පහ කොට,

**पूर्वन्तावदहं मूर्खो द्वितीयः पाशबन्धकः।**

**ततो राजा च मन्त्री च सर्वं वै मूर्खमण्डलम्॥ इति श्लोकं पठित्वा यथासुखमाकाशमार्गेन प्रायात्।**

''පෙර යම් තාක් මම මෝඩයකු වීමි. දෙවැනි මෝඩයා වැද්දා යි. අනතුරුව රජු ද මන්ත්‍රීවරයා ද යන මේ සියල්ලෝ ම මෝඩ මණ්ඩලයකි.''යන ශ්ලෝකය කියා අහස් මඟින් ඉතා සුවසේ ගියේ ය.

**पञ्चतन्त्रे काकोलूकीयम्। कथा १०**

<u>අර්ථ පරිවර්තනය</u>

## वत्स! त्वं श्रृगालीसुतः।

දරුව, නුඹ සිවලියකගේ පැටවෙකි.

कस्मिंश्चिद्देशे सिंहदम्पती प्रतिवसतः स्म। अथ सिंही पुत्रद्वयमजीजनत्। सिंहोऽपि नित्यमेव मृगान्व्यापाद्य सिंह्यै ददाति। अथान्यस्मिन्नहनि तेन किमपि नासादितम्। वने भ्रमतोऽपि तस्य रविरस्तं गतः। अथ तेन स्वगृहमागच्छता श्रृगालशिशुः प्राप्तः। स च बालकोऽयमित्यवधार्य, यत्नेन दंष्ट्रामध्यगतं कृत्वा सिंह्यै जीवन्तमेव समर्पितवान्। ततः सिंह्याऽभिहितम् – “भोः कान्त ! त्वयानितं किंचिदस्माकं भोजनम् ?” सिंह आह – “प्रिये !

मयाऽद्यैनं शृगालशिशुं परित्यज्य न किंचित्सत्त्वमासादितम् ; स च मया "बालोऽयमिति" मत्वा न व्यापादितो विशेषात्स्वजातीयश्च।

कस्मिंश्चिदुद्देशे කිසියම් කැලෑ ප්‍රදේශයක सिंहदम्पति සිංහ යුවලක් प्रतिवसतः स्म। වාසය කළේ ය.

अथ ඉක්බිති सिंही पुत्रद्वयम् अजीजनन्। සිංහදෙන පුතුන් දෙදෙනෙකු වැදුවා ය.

सिंहः अपि नित्यम् एव मृगान्व्यापाद्य සිංහයාත් නිතර ම සතුන් මරා सिंह्यै ददाति। සිංහදෙනට දෙයි.

अथ ඉක්බිති अन्यस्मिन् अहनि එක්තරා දිනයක तेन किमपि न आसादितम् । ඔහු විසින් කිසිවක් නොලබන ලදී.

तस्य वने भ्रमतः अपि रविरस्तं गतः।

ඌ වනයෙහි හැසිරෙද්දී ම හිරු බැස ගියේ ය.

अथ ඉක්බිති स्वगृहम् आगच्छता तेन සිය ගෙට එන ඔහු විසින් श्रृगालशिशुः සිවල් පැටියෙක් प्राप्तः। ලබන ලදී.

सः च හෙතෙමේ ද अयं बालकः इति अवधार्य මූ පැටියෙකැයි සලකා यत्नेन වෑයමෙන්

दंष्ट्रामद्यगतं कृत्वा දත්වලින් මැදිකොට [අල්වාගෙන] जीवन्तं एव පණ තිබියදී ම सिंह्यै සිංහ දෙනට समर्पितवान्।[ගෙනවිත්] දුන්නේ ය.

ततः सिंह्या अभिहितम्। ඉක්බිති සිංහදෙන විසින් කියන ලදී.

भोः कान्त පින්වත් ස්වාමිය, त्वया ඔබ විසින් अस्माकं අපහට किंचित् भोजनम् आनितम्? කිසියම් ආහාරයක් ගෙනෙන ලද්දේ ද?

सिंहः आह। සිංහයා කීය. प्रिये සොඳුරූ, मया अद्य මා විසින් අද एनं शृगालशिशुं परित्यज्य මේ සිවල් පැටවා හැර किंचित् सत्त्वं කිසි සතෙක් न आसादितम् । නොලබන ලදී.

मया මා විසින් [වනාහි] अयं बालः इति मत्वा न व्यापादितः। මූ පැටියෙකැයි සිතා නොනසන ලද්දේ ය. विशेषात् විශේෂයෙන් सः च स्वजातीयः च। ඔහු ද අපගේ වර්ගයට අයිති එකෙක් ද වෙයි.

इदानिं त्वमेनं भक्षयित्वा पथ्यं कुरु। प्रभातेऽन्यत्किञ्चिदुपार्जयिष्यामि। सा प्राह – "भोः कान्त ! त्वया बालकोऽयमिति विचिन्त्य न हतः, तत्कथमेनमहं स्वोदरार्थे विनाशयामि?" "तस्मान्ममायं तृतियः पुत्रो भविष्यति।" इत्येवमुक्त्वा तमपि स्वस्तनक्षीरेण परां पुष्टिमनयत्। एवं ते त्रयोऽपि शिशवः परस्परमज्ञातजातिविशेषा एकाचारविहारा बाल्यसमयं निर्वाहयन्ति स्म। अथ कदाचित्तत्र वने भ्रमन्नरण्यगजः समायातः। तं दृष्ट्वा तौ सिंहसुतौ द्वावपि

कुपिताननौ तं प्रति प्रचलितौ यावत्, तावत्तेन श्रृगालसुतेनाभिहितम् – "अहो, गजोऽयं युष्मत्कुलशत्रुः; तन्न गन्तव्यमेतस्याभिमुखम्।" एवमुक्त्वा गृहं प्रति प्रधावितः। तावपि ज्येष्ठबान्धवभङ्गान्निरुत्साहतां गतौ।

इदानिं त्वम् දැන් නුඹ एनं भक्षयित्वा पथ्यं कुरु මූ අනුභව කොට බඩගින්න නිවාගන්න.

प्रभाते अन्यत् किञ्चित् උදේ අන් කිසිවක් उपार्जयिष्यामि। සොයා දෙන්නෙමි.

सा प्राह। ඇය කීවාය. भोः कान्त පිනවත් ස්වාමිය, त्वया නුඹ විසින් अयम् बालकः इति विचिन्त्य न हतः। මූ පැටියෙකැයි සලකා නොනසන ලදී.

तत् ඉදින් अहं මම स्व उदरार्थे බඩගින්න වෙනුවෙන් कथम् एनम् विनाशयामि। කෙසේ මූ මරම් ද?

तस्मात् ඔබැවින් अयं මොහු मम तृतियः पुत्रः भविष्यति। මගේ තුන්වැනි පුතා වන්නේ ය.

इति एवं उक्त्वा යනුවෙන් මෙසේ කියා स्वस्तनक्षीरेणතමාගේ පියවුරු කිරෙන් तम् अपि ඌ ද

परां पुष्टिम् अनयत्। පෝෂණය කළේ ය.

एवं මෙසේ ते त्रयः शिशवः अपि ඒ පැටව් තිදෙනාත් परस्परम् अज्ञातजातिविशेषाः උනුන් නොදන්නා වූ ජාති විශේෂය ඇත්තේ एकाचारविहाराः එක්ව හැසිරෙන්නාහු बाल्यसमयं निर्वाहन्ति। ළමා කාලය ගෙවත්.

अथ ඉක්බිති कदाचित् කිසියම් දිනක तत्र वने भ्रमन् अरण्यगजः ඒ වනයෙහි හැසිරෙන්නා වූ වන ඇතෙක් समायातः। පැමිණියේ ය.

तं दृष्ट्वा ඌ දැක द्वौ अपि तौ सिंहसुतौ ඒ සිංහ පැටවුන් දෙදෙනාත් कुपित आननौ කෝප වූ මුහුණ ඇත්තාහු तं प्रति ඌ [ඇතා] වෙතට यावत् प्रचलितौ तावत् යම්තාක් ගමන් කරත් ද ඒතාක්

तेन श्रृगालसुतेन अभिहितम्। ඒ සිවල් පැටවා විසින් මෙසේ කියන ලදී.

अहो අපොයි अयं गजः මේ ඇතා युष्मत् कुलशत्रुः। නුඹගේ පාරම්පරික සතුරෙකි.

तत् ඒ නිසා एतस्य अभिमुखम् न गन्तव्यम्। ඔහු ඉදිරියට නොයා යුතු ය.

एवम् उक्त्वा මෙසේ කියා गृहं प्रति प्रधावितः। ගෙදර දිව්වේ ය.

तौ अपि ඔවුහු දෙදෙනා ද ज्येष्ठबान्धवभङ्गात् වැඩිහිටි සහෝදරයා නොමැතිවීමෙන්

निरुत्साहतां गतौ। අධෛර්යමත් විය.

अथ तौ द्वावपि भ्रातरौ गृहं प्राप्य पित्रोरग्रतो विहसन्तौ ज्येष्ठभ्रातृचेष्टितमूचतुः - यथाऽयं गजं दृष्ट्वा दूरतोऽपि प्रनष्टः। सोऽपि तदाकर्ण्य कोपाविष्टमनाः प्रस्फुरिताधरपल्लवस्ताम्रलोचनस्त्रिशिखां भ्रकुटिं कृत्वा तौ निर्भर्त्सयन् परुषतरवचनान्युवाच। ततः सिंह्या एकान्ते नीत्वा प्रबोधितोऽसौ – "वत्स! मैवं कदाचिज्जल्प

भवदीयलघुभ्रातरावेतौ” इति। अथासौ प्रभूततरकोपाविष्टस्तामुवाच “किमहमेताभ्यां शौर्येण, रूपेण, विद्याभ्यासेन, कौशलेन वा हीनो, येन मामुपहसतः ? तन्मयाऽवश्यमेतौ व्यापादनीयौ। तदाकर्ण्य सिंही तस्य जीवितमिच्छन्त्यर्विहस्य प्राह।

अथ ඉක්බිති तौ द्वौ अपि भ्रातरौ ඒ සොහොයුරෝ දෙදෙනා गृहं प्राप्य ගෙදර අවුත්

पित्रोः अग्रतो विहसन्तौ පියා ඉදිරියේ සිනාසෙන්නාහු ज्येष्ठभ्रातृचेष्टितम् වැඩිහිටි සහෝදරයාගේ ක්‍රියාව පිළිබඳ ව ऊचतुः කීය.

यथा යම්සේ अयं गजं दृष्ट्वा මොහු ඇතා දැක दूरतः अपि प्रनष्टः। ඈතින් ම පැන ගියේ ය. [යනුවෙනි.]

सः अपि तत् आकर्ण्य ඔහු ද ඒ අසා कोपाविष्टमनाः කුපිත වූ සිතැත්තේ, प्रस्फुरित अधरपल्लवः පොපියන තොල් ඇත්තේ ताम्रलोचनाः තඹවන් වූ ඇස් ඇත්තේ त्रिशिखां भ्रकुटिं कृत्वा බිඳුණු බැම ත්‍රිශූලයක් [මෙන්] කොට

तौ निर्भर्त्सयन् ඔවුන් දෙදෙනාට තර්ජනය කරමින් परुषतरवचनानि उवाच। රළු වදන් [කුණුහරුප] කීවේ ය.

ततः ඉක්බිති प्रबोधितः सिंह्या අවදි වූ සිංහ දෙන විසින් असौ एकान्ते नीत्वा, ඔහු පසෙකට කැඳවාගෙන ගොස්, ''वत्स ''දරුව, कदाचित् एवं मा जल्प। කිසිදින එසේ කථා නොකරන්න. एतौ මේ දෙදෙනා

भवदीय लघुभ्रातरौ इति।'' නුඹේ කුඩා සොහොයුරෝ ය. යනුවෙන් [පැවසූවා ය.]

अथ ඉක්බිති असौ ඔහු प्रभूततरकोपविष्टः වඩාත් කෝප වූයේ तां उवाच। ඇයට කීවේ ය.

किं කිම येन माम् उपहसतः एताभ्यां යම් හෙයකින් මට උපහාස කරන මේ දෙදෙනාට වඩා

अहं මම शौर्येण, रूपेण, विद्याभ्यासेन, कौशलेन वा हीनः। ශූරත්වයෙන්, රූපයෙන්, ශාස්ත්‍ර ඥානයෙන් හෝ කුශලතාවලින් අඩු එකෙක් ද?

तत् ඒ නිසා मया මා විසින් अवश्यम् අනිවාර්යයෙන් [ම] एतौ व्यापादनीयौ। මොවුන් දෙදෙනා මැරිය යුතුය.

तदाकर्ण्य එය අසා सिंही अन्तर्विहस्य සිංහ ධේනුව ඇතුළතින් සිනාසී तस्य जीवितम् इच्छन् ඔහුගේ ජීවිතය [රකිනු] කැමැත්තී प्राह। මෙසේ කීවා ය.

तत्सम्यक् श्रृणु – “वत्स! त्वं श्रृगालीसुतः। कृपया मया स्वस्तनक्षीरेण पुष्टिं नीतः। तद्यावदेतौ मत्पुत्रौ शिशुत्वात्त्वां श्रृगालं न जानीतः, तावद्दुततरं गत्वा स्वजातियानां मध्ये मिलितो भव। नो चेदाभ्यां हतो मृत्युपथं समेष्यसि।” सोऽपि तद्वचनं श्रुत्वा भयव्याकुलमनाः शनैः शनैरपसृत्य स्वजात्या मिलितः।

तत् එසේනම් वत्स ! දරුව, सम्यक् श्रृणु। මනාව අසාගන්න, त्वं श्रृगालीसुतः। නුඹ සිවලියකගේ පැටවෙකි.

**मया** මා විසින් **कृपया** කරුණාවෙන් **स्वस्तनक्षीरेण पुष्टिं नीतः।** [නුඹ මගේ] පියවුරු කිරෙන් පෝෂණය කරන ලදී.

**तत्** එබැවින් **मत् एतौ पुत्रौ शिशुत्वात्** මගේ මේ දරු දෙදෙනා කුඩා [පැටවු] බැවින් **यावत्** යම්තාක්

**त्वां श्रृगालं** නුඹ සිවලෙකු බව **न जानीतः।** නොදනිත්.

**तावत् द्रुततरं गत्वा** ඒ නිසා වහා ගොස් **स्वजातीयानां मध्ये मिलितः भवः।** තම වර්ගයා සමග එක්වන්න.

**नो चेत्** එසේ නොවුණහොත් **एभ्यं** මොවුන් දෙදෙනා විසින් **हतः मृत्युपथं समेष्यसि।** පහර දෙන ලදුව මරණයට පත්වන්නේ ය.

**सः अपि तत् वचनं श्रुत्वा** ඌ ද ඒ වචනය අසා **भयव्याकुलमनाः** බියෙන් අවුල් වූ සිතැත්තේ **शनैः शनैः**

**अपसृत्य** සෙමෙන් සෙමෙන් බැහැරට ගොස් **स्वजात्या मिलितः।** තම වර්ගයා හා එක්විය.

पञ्चतन्त्रे लब्धप्रणाशम्। कथा ०४